पं. द. १०

१११ काण्वोपनिषद् - तृतीयध्याय
प्रथमं ब्राह्मणं

Acc. No. :- ~~305~~ M1173

Title :- ~~कण्वोपनिषद भाष्य~~ काण्वोपनिषद्भाष्य

Subject :- वेदांत

पत्र :- 31

(1)

कु २४

स्वाविद्याविलसत्प्रसृतविपुलद्वैतप्रपंचादितस्य ... भाति ...

॥श्रीगणेशाय नमः॥ ॥ स्वाविद्याविलसत्प्रसृतविपुलद्वैतप्रपंचादितं विश्वमव्ययमजं ज्ञात्वात मे ...
गरो मन्यते। निर्गुणं सकलाभिधानमननव्यापारदूरस्थितं वंदे नंदितचेतसं गुरवो दृत्तिं सतां शांतये। अथा
॥१॥ यं काण्वोपनिषत्खण्डेन सकलाम्नायार्थरत्नौघनीसंचयं कुर्गुरवोनुदध्वा प्रक्रम्यते ब्रह्म ततः॥२॥ अत्र चोपनि
विषकरणं तार्किककल्पितशंकास्पदत्तिरस्कृतये तस्यानायसमाश्रितेन वचसा प्रक्रम्यते ब्रह्म ततः कुतः। उपोपसर्गः सामीप्ये तच्च प्रतीचि समा
ई बंधब्दो ब्रह्मविद्यैकगोचरः। तत्रैवास्य सद्भावादस्ति यार्थस्य तत्कुतः। उपनीयमानं ब्रह्मापास्त द्वयं यतः। निहंत्यविद्यां
प्यते। त्रिविधस्य सदर्थस्य निशब्दोपि विशेषणं। उपनीये ममात्मानं ब्रह्मापास्त द्वयं यतः। निहंत्यविद्यां तज्जं च तस्मादुपनिषन्मता। यथोक्तविद्या बो ॥१॥
तज्जं च तस्मादुपनिषद्भवेत्। निहत्यानर्थमूलस्वाविद्यां प्रत्यक्तया परं। गमयत्यस्तसंभेदमतो वोपनिषद्भवेत्।
द्भवेत्। प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोवसादयेद्विद्या तस्मादुपनिषन्मता। यथोक्तविद्याबोधितार्यते।
पिवाक्षुधोपितदर्जे रतः। जवेदुपनिषन्नामावाग्जीवनं यथा। अरण्याध्ययनाच्चैतदारण्यकमितीर्यते। सर्वोपनिषदामाहुरुक्तिमा
ग्रहत्वात्स्वर्थतोर्थाद्बृहदारण्यकं मतं। इत्यादि नमस्कृत्याप्तिच्छयना प्रकृतोचितं। सर्वोपनिषदामाहुः ...। यत्स्व
त्रं प्रयोजनं। मिथो विरोधात्सिद्ध्यर्थं कर्मज्ञानाधिकारिणोः। संसारनिर्विद्यस्तु यस्य इत्यक्तिज्ञापकत्वं गतौ। यच्च
शेषक्रियस्येव संसारं प्रजिहासतः। जिज्ञासेरेव चैकात्म्यं त्रयंते ह्यधिकारिता। एतमेवेति च तथा प्रत्यग्या
धात्मवित्तये। सर्वकर्मत्यजं प्राह श्रुतिर्विद्याधिकारिणां। प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः। ब्रह्मावाप्त्यै
तु तत्यागमीप्संतीति श्रुतेर्बलात्। तत्राधिकारविषय प्रतिपत्त्यर्थमीरितं। संसारहेतिवित्तिवचः स्फुटन्या
योपदृंहितं। ऐकात्म्यविषयान्नान्यो वेदांतवचसां यतः। उच्यते विषयः कश्चित्तद्विशात्स्मात्तमोपनुत्।

संसारकारणाविद्याध्वंसकज्ञानलब्धये। आरब्धेयं प्रयत्नेन वेदांतोपनिषत्परा। प्रत्यग्याथात्म्यधीरेवप्र
त्यगज्ञानहानिकृत्। साक्षात्मोत्पत्तितो नान्यतूध्यो तथ्यस्तावपेक्षते। साधनं चाधिकारी च कर्म विज्ञानकांड
योः मिथो विरोधतः सिद्धावधुनातत्र नोच्यते। न च न्याय्योदयवन्मुक्तिंग्रणिमो विचित्रलक्षणां। कार्यं विनानाधिका
री नापीष्टापफलसंगमः। लभ्यते लौकिकोपीह किं मंगमम सश्रयः। विचित्रलक्षणसिद्ध्यर्थं संति वाक्यानि च
कृतो। कुर्वीत क्रतुमित्यादि विधिरभ्युदये यथा। उपासीतेति च तथा मुक्तावपि समीक्ष्यते। नाभ्युदयस्य मुक्ते
ख्य साध्यासाध्यकृ वा कृ वा। वैलक्षण्यान्न मुक्ते संतुल्य साधनतातयोः। अन्यच्छ्रेयो अन्यदुतैव प्रयस्तो उभे
ना नार्थे पुरुषं सिनीतः। तयोः श्रेय आददानस्य साधु भवति हीयतेर्थाद्य उप्रेयो वृणीते। परीक्ष्य लोकान्कर्म
चितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनि
ष्ठं। न च न्याय्योदयवत्साध्या मुक्तिरप्राप्तरूपतः। मैवं साध्यापि नो मुक्तिर्नत्वभ्युदयवद्यतः। स्वतो मुक्तांतरा
यस्य तमसो विच्छया हतेः। तत्कैवल्यमतः साध्यमुपचारात्स्वयं [illegible]ते। चिकित्सयैव संप्राप्यं स्वास्थ्यं रोगा
र्दितस्य तु। आत्माविद्याहते बोधात्तत्कैवल्यमवाप्यते। अलौवा इदमित्यादि श्रुतेर्वेति तथा श्रुतिः। सुषुप्त
नरवत् [illegible] त्या बोध्यातेयं न कार्यते। किमत्रापि विना कार्यमन्यतं त्वयहेतुतः। श्रुतोप्यनर्थं कोत्र स्यादि
यथार्थसिंवचतः। यज्ञाच्छानीतिकर्तव्ये नाधिकारो निरूप्यते। तदप्यशेषतश्चोद्यमूर्ध्वमुन्मूलयिष्यते।
परः। आत्मनः स्वास्थ्यं श्रेयो यच्चित्तं वांछसि। कर्मण्येतत्सिध्येद्भुतात्वात्कर्मणः कृतो कृतौ स्मृतौ च विशि

मर

तं कर्मैव बध्यते यतः। न च कर्मातिरेकेण मुक्त्यभ्युदय साधनं। यन्नतोन्यायतः किंचित्परस्या मोवेद बहु
षा। निषेध विधि मात्रत्वाद्वेदार्थस्येद सर्वतः। ननु भक्तो पुरोक्तानि वाक्यानि बहुशो मया। अविधायि
त्वतस्तेषां नन्याय्यं भवतोदितं। आम्नायस्य क्रियार्थत्वात् विधिनेति च सूत्रणात्। विधिशेषतयाते
षामेकवाक्यत्व संभवे। वयसा मक्रियार्थानां कंपनेदप्रकल्पना। गुर्वी स्यान्ननु कैवल्यं फलं नित्यमि
ष्यते। कथं नित्यं भवेत्तन्नो यदि स्यात्कर्मणः फलं। कर्मोत्थं न यतः किंचिद्ध्रुवं जगतीवीक्ष्यते।
तत्साधनेन नचावश्यं भवितव्यमतो भवत्। पारिशेष्यादिद ज्ञानं वेदांते तत्प्रसिद्धितः। नैवं क्रि
याभ्य एवास्या मुक्तेः सिद्धत्व हेतुतः। कुतः क्रियाभ्यः सिद्धिश्चेच्छृणु तद्भण्यते यतः। निषिद्धकाम्ययोस्त्या
गा कर्मणो नित्यकर्मणः। करणात्प्रत्यवायस्य हतेर्नौ जेन च क्षयात्। शारीरारंभकस्यैवं भुक्तिः सि
द्धांततरात्मनः। विनाप्येकात्म्यसंबोधात् कर्मणैवोक्त वर्त्मना। ननु चात्माव बोधस्य निध्यायेति
फलं श्रुतं। ब्रह्म वेदेति च तथा नैवं तस्यार्थवादतः। फलश्रुतेरर्थवादत्वं द्रव्य संस्कार कर्मसु। सर्व
त्र दर्शनाच्छास्त्रे पर्णमय्यां फलश्रुतिवत्। आत्मनः कर्मशेषत्वात्तद्विपः कर्मशेषता। विधिश्चयानि
छतापि लभ्यरूपे यार्थवादता। नैवं तद्धेतुतत्पचिरोधादितरेतरं। मुक्त्यभ्युदययोरस्मान्न सम्यग्भ
वतोदितं। स्वरूपे वस्थितिर्मुक्तिरात्मनो भवतोच्यते। कम्पादिवर्जनादिभ्यस्तस्याः सिद्धिश्च वर्ण्यते।
तत्रात्मा किं स्वरूपे ज्ञाङ्ग तस्थौ येन तास्थितो। हेतुं व्यपेक्षते यन्नो स्वरूपं हि तद्भवेत्। स्वतो न च व

॥२॥

स्थितो यत्र हेतुना स्थाप्यते बलात्। अथावस्थित एवायं किमर्थं हेतुमार्गणं। केवलोऽपि च तत्सकृ
र्न निर्मोक्षः प्रसज्यते। अतो निषिद्धकाम्यादिवर्जनान्नासमुक्तता। विषयाभ्याससञ्जातास्वास्थ्यादुत्प
र्थमिति चिन्त्यतां। सत्यं विषयसंपर्कः कस्माद्भवति कारणात्। अकस्माद्भवतः सकृन्मुक्तावप्यनिषेध
तः। अनिर्मोक्षप्रसक्तिर्वा तथा सति समापतेत्। धर्माधर्मनिमित्तश्चेत् किं पुनर्धर्मपातकौ। अप्यसंग
स्वभावस्य संपर्कं कुरुते बलात्। न ह्युत्तकाकवद्धस्तेनाहिर्मोकेसरं नापि। कुत्रालोऽपि कुबालः सन्नवरादि
स्वभावकं। मूर्धधौमचर्याकुर्वन्मिरुद्धां तेभ्यं रीततां। आत्माकर्षी रिरूपत्वेऽन्मा कां दीस्त हि मुक्तता। नहि
स्वभावो भावानां व्यावर्त्येत सोऽग्निवद्द्रवेः। स्वभावाद्धि निवृत्तोऽर्थो निःस्वभावः खपुष्पवत्। नाविनश्यन्यतो
वह्निर्व्यावर्त्येत उष्णतः क्वचित्। न च कर्तृत्वनिर्मुक्ते मुक्तिः संभाव्यतेऽन्यतः। ननु कर्तृत्वभोक्तृत्वकार्यमेवात्म
संसृतिः। न तु तच्छक्तिरिष्येवं शक्तिमात्रं तया स्थितौ। सर्वानर्थविनिर्मुक्तेरूपपन्ना तमुक्तता। नैवं भेदस्तथाभे
दो दोषः स्याच्छक्तिकार्ययोः। शक्तितत्कार्ययोर्यस्माद्व्यतिरेको न विद्यते। नियमास्त्ववः प्राप्यव्यतिरेकस्तयोर्य
दि। कार्यकारणनस्यात्स्वतो भेदेन सिद्धयोः। अभेदे च तयोरैक्यात्कार्यकारणता कुतः। नाकुर्वत्कारणं दृष्टं
कार्यं वाऽक्रियमाणकं। अथाभेदस्तयोरिष्टः कार्यध्वंसौ प्रसज्जते। तद्वच्छक्तेरपि विध्वंसस्तयोरव्यतिरेकतः।
शक्तिस्वरूपहानेन च शक्तिमद्रूपनिह्नुतिः। तयोरव्यतिरेकश्चास एवायापनीप्सितः। निरात्मवादः पूर्वोक्तस्तस्मा
न्नैवं प्रकल्प्यते। मतं कार्यानभिव्यक्तिर्निमित्तासंभवाद्यदि। शक्तेरिति न तत्पक्षे शक्तिहेतुसंभवात्। श
क्तिरूपेण संबद्धो निमित्तानाम पीष्यते। नैमित्तिकैरिति तत्तो वह्नेश्चादिसमानता। कार्यस्य शक्तितं त्वचे

6

मु।वा

त्रिक।

सर्वदाकारणस्थितेः। कार्योत्पत्तिः सदैव स्यान्निदाघे घर्मवद्यतः। तथैव शान्त्यतंत्रत्वेऽप्येष दोषो
यतो भवेत्। सदा कार्यं न जायेत कारणासंभवात्सदा। निदाघे शीतवद्यस्मादतो सम्यगिदं वचः
निःकारणस्य चोत्पत्तौ कार्यजन्म सदा भवेत्। कार्यता वा कुतोऽस्य स्याद्भवेत्कारणतंत्रता। नन्वशक्य
प्रतिज्ञातजन्मा स्त्योमृतेर्नृभिः। निषिद्धकाम्यकर्मादिवर्जनं निपुणैरपि। सूक्ष्मापराधसंदृष्टेर
तियत्नावतामपि। संशयस्तु भवत्येव पश्लोसिद्धिस्तु तावता। अथ येन मोक्ष्यते सोऽत्र यस्य संपत्स्यते तथा।
त्वदुक्तं नैतद्देवं स्याद्वक्ष्ये हेतुतः। निश्चितं साधनं वाच्यं ज्ञेनं निःश्रेयसं प्रति। न तु याहृक्षी की सिद्धिर्वक्ष्यते
रुवि पश्चिता। देवगोचर एवैष न तु मानुषगोचरः। स हि कर्त्रीं भवेच्छक्तिरिति न्यायात्कृवे यदि। मनुष्यगोचरापी

।।७।।

ति नारव्यातासंभवात्तथा। मुमुक्षुर्नहि काम्यादिवर्ज्ये प्रेदितिचोदना। अस्ति वेदे क्वचिद्येन शक्ते र्विध्येकदेश
ता। काम्यादिवर्जनं चेत्तं प्रति प्रजवर्यतः। नातः [illegible] कथंचिदपि फल्यते। नित्यादिकरण
क्रियायां तु दुष्कवो अर्थान्तरास्व [illegible] निवार्यते। अन्यतो भवने मानं न चेदस्ति हि संशयः। ए
तावताप्यपद्वस्तो प्रतिबद्धो न सिध्यति। अथैतयोरिति तथा चोदनार्थातिलंघिनां। सुखदुःखादिसंदृष्टेर्न
वाप्यस्ति हि संशयः। नित्यस्याकरणे दोषस्तत्क्रियायां न यद्यपि। अन्यतोऽसौ स्वजो बाधो न तु मानेन वार्यते।।
नित्यादेः फलमिच्छंयत्नपात्तदुरितक्षयः। तथाप्यागामिदोषेभ्यः शंका पूर्ववदुत्कवेत्। अनज्ञीष्टफलानां
यदुरितक्षयो भवेत्। नत्वाप्यदृष्टिकानां स्याज्जीष्टत्वात्क्षयस्तव। सर्वेषां दुष्टतायेत्स्यान्न विधा

नादद्दुष्टता। नापिश्रये नादितुल्यत्वं फलदोषेण दुष्टता। ऐकात्म्यज्ञानतत्त्वेष्वया यथार्था कर्मप्रधानता।
प्रधानत्वं च विद्याया स्तमेतमिति दर्शितं। तत्र क्रमेण मार्गेण कर्तृसंस्कारकारिणी। ऐकात्म्यज्ञानता
त्पर्यं कर्मणामिति निश्चितं। तेन निःसारतां बुद्ध्वा कर्मणां वेदतत्त्ववित्। ऐकात्म्यज्ञानमन्वेति तपोमु
पितकल्मषः। यस्तु जन्मान्तराभ्यासात् क्षपितः शेषकामनः। आदावेवाधिकारी स पुनः कर्मनवीक्षते ॥
विरक्तस्य मुमुक्षुजिज्ञासोर्मनीनाव्यान्यथापेक्षणं। कर्मापेक्षा हि साध्यार्थे सिद्धेऽर्थे तदनर्थकं। वामदेवस्य मैत्रेय्या
श्चैतरासं जनकोत्तादुक्शुनिः सतु वाद्भवेत्। एवं निषिद्धवाक्येषु यथोक्तन्यायमर्दित्वात्। नित्यकर्मवचस्येव सूच
संजवात्। ततः शेषेण वचनात् तथा तथ स्रेयतः। अनन्तदेहहेतोश्च विप्रघातस्य
त्वं नित्यस्यनापि दुरितक्षय मात्रकं। फलान्तरश्रुतेः साक्षात् यथाम्रस्मृतेस्तथा। आत्मनिमित्त ऋत्या
दिस्यापस्तंबस्मृतेर्वचः। फलवत्वं समाचष्टे नित्यानामपि कर्मणां। तुकमेव तु संशीतां वियंतत्र निमि
तिः। कार्यमारन्नतेत्राक्तिर्यक्किंचेस्व्यवस्थिता। यस्मादसति कार्ये सो शक्तिरेव नासिध्यति। कार्यकार
णयोः सिद्धिरन्योन्याव्यतिरेकतः। कर्तृज्ञोर्द्ध स्वरूपेतो लक्ष्यपेतैं तराशनि। नमुक्त्याशास्तिमृद्वे किन्न्या
यमार्गसमाश्रयात्॥१००॥ सापराधत्वतो मुक्तिः संदिग्धेव प्रसज्यते। द्विजातीनां स्वरादेश्चेत्तथा
स्यादसंशयः॥ ननूक्तं कर्मशेषत्वमात्मनो यागकर्तृतः। नैतदेवं यतो नैतत्कर्मांगं ज्ञानमिष्यते। कर्तृत्व
मात्मनः सिद्धं यतो न्यत्रापि यागतः। निःशेषकर्मकारित्वात्तस्मादक्रमपेक्षा। न ह्यात्मज्ञानविरुद्धकर्मक

चैं न शक्यते। पूर्णज्ञानमृते यद्वस्तु हृल्लंघुं न शक्यते देहान्तरप्राप्तिसंबंधीनत्वात्तस्त्वात्मज्ञानतः। वि
वेकिनो न मुक्तेयं प्रवृत्तिः पारलौकिकी। एवं तर्हि न कर्मांगिं कर्तृत्वे हेतुतः। फलार्थिवन्नात्मज्ञानं क्रि
यांगत्वेन चोदितं। नन्वेवमपि सिद्धस्यात्मवेशः सर्वकर्मसु। आत्मज्ञानस्य सामर्थ्यान्निनाम विधिसंबं
धात्। नैतदेवमविज्ञाततत्त्वस्यैव हि कर्मसु। अनात्मार्थविशिष्टस्य ह्यधिकारत्वहेतुतः। स्वरूपआत्म
नः स्थानमात्रं निश्रेयसंबुधाः। ततोऽन्यो नाप्तिसंबंध आत्मनो ज्ञानहेतुकः। आगंतु नात्मस्वरूपं तत्त्वसंवि
त्त्यैव गम्यतां। नातो वाप्तपुमर्थस्य स्वरूपावस्थितस्य तु। कर्तृभोक्त्रादिरूपत्वं प्रत्यग्ज्ञानतोऽन्यतः।
कर्मतत्फलभोगश्च बाह्यानि करणानि च। ततोऽपि बाह्यो देहश्च जातिस्तत्समवायिनी। उपामरण
जन्मानि देहाधिकरणानि च। दारपुत्रधनादीनि देहबाह्यानि यानि च। कर्माधिकारिहेतूनि स्वतोऽस्यान ।।४।
धिकारिणः। अविज्ञातस्यात्मनो मोहाद्देहकानीति मन्यते। विशेषणं स्वरूपं वा नान्योन्यस्य तो यतः।
लोके दृष्टं विनाऽविद्यां मोहाद्दृष्टं च तु सर्वदा। चोरोऽसौ मामुपैतीति सोऽयं चोरविशेषणं। स्थाणुसंज्ञा
वयस्य ज्ञानन्तु दृष्टमाविना। नन्वविद्यामृतेऽप्यन्यद्दृष्टमन्यविशेषणं। औपगवोऽत्र पहयस्तथा त्र्येन
पिदादयः। नैतदेवं यतस्तत्रत्ये प्रत्यक्षमपेक्षते। अन्येनान्यस्य संबंधः क्रशोऽहमितिवत्क्वचित्। उपगवा
दिर्हि पित्रादिः प्रकृत्यर्थो विशेषणं। जिन्मस्यापि गवापत्यप्रत्ययार्थस्य गम्यते। नैवं कर्त्रादिदेहतान्तत्वा
त्यादीन्देहगांस्तथा। व्यतिरेकतया कश्चिद्विशेषणं दृष्टी हमानवः। यत आत्मतयैवैते विशिनष्ट्यविशेषणं।
करोम्यंधो द्विजो बालो दग्धश्छिन्नो हमित्यपि। नाविद्यामंतरेणैषां विशेषणविशेष्यता। उयमेवात्मनो
ज्ञेया कर्माधिकृतिकारणं। आरीति यं तेपेनेते बृहस्पतिसवादिषु। अतो न वगतैकात्म्यकर्माधिकृतिहेतु

तः। ऋत्यादिमानप्रमितप्रसरया थात्म्य निश्चितं। सर्वकर्मसमुच्छेत्ति ज्ञानं वेदांतमानजं। तन्मूलज्ञान
धातिवाऽज्ञानस्येव प्रसिद्धितः। न तु स्ववर्त्तकं तस्मान्नार्थवादत्व संभवः। फलोक्तेः पर्णमय्यां तु युज्यते क
र्मशेषतः। यत्त्वचोदितया पीयमज्यं पेयार्थवादता। अनिच्छतापि विधेयमत्र प्रतिविधीयते। इत्थमस्येवा
र्थवादत्वं यथा सोन्यपरत्वतः। यथा ऋतार्थवादित्वं न त्वनृतार्थवादता। इज्यते स्वर्गलोकाय दर्शौ दर्शौ य
थात तथा। न चानृतार्थवादित्वं पापरूपोकाऋते यथा। कुतः प्राप्तं फलमिति प्रत्यक्षं साम धीफलं। यतो व
गम्यते तेन ज्ञानं कर्मन लौकिके। प्रवृत्तेः प्रतिकूलत्वात् मुक्तिं प्रति विरोधतः। मुमुक्षोरधिकारोतो निवृत्तो स
र्वकर्मणां। प्रवृत्तिहेतु प्रध्वस्तो न प्रवृत्तो कथं च न। नाकिप्रेतपुर प्राप्ति समर्थं सुगमं त्रिवेदी वारिपथ्यदनो
पेतं सर्वानर्थ विवर्जितं। प्राप्तं मार्गं परित्यज्य तद्विरुद्धेन वर्त्मना। यियासति सुधीः कश्चिद्यथा त्रांतो धग
स्तथा। तथा विधो ज्ञकर्त्रादि धर्मशून्य मविक्रियं। आत्रियो कारकं ज्ञाला निःशेषपुरुषार्थदं। आत्मप्रत्ययमाग
ब स्यमात्मानं देव मंजसा। तारस्थितो फलेऽ जीवे नित्ये साधनवर्जिते। तद्विरुद्ध फले बाह्य साधनेऽनेककारके।
कथं कर्मणि सर्वज्ञो मनो दध्याद्धसन्नपि। सम्यग्धीमुदिताशेष ध्वांतस्यैव न पूर्ववत्। अज्ञानादि पुनः
कर्तृत्वाच्च तेऽकारकत्वतः। श्रुत्यादिमान प्रमितयाथात्म्य ज्ञान तत्फलं। प्रतिकूलत्वतो विद्वान्यतः कर्म
मुनेस्ततो। अतोऽशस्यैव निःशेष मुमुक्षुप्रतिहासितं। कर्त्ता च नाम धर्मस्य कर्मणि क्षति रात्मनः। त्विचाले
मोहतत्कार्य विरोधाविरोधाद परस्परं। रोगादिवदनर्थत्वात् कर्त्रादिः प्रविहासितः। जिहासितुः स्वभावो
सो चित्यक्तिः शिष्टु वाक्यका। कर्त्रादिष्व स्वभावः स्यात्स सत्ता कर्तरूपिणः। प्रत्यक्षादि विरोधः स्यादनिर्मो
क्षस्तथैव च। अस्तु कामममनिर्मोक्षो विक्रियावत्त्वतो दृशेः। अग्निवत्फलभोक्तृत्वान्नो चेदाकाशकल्पता।
इति चेन्नात्मतो धौव्यादि क्रियानुपपत्तितः। मूर्त्तामूर्त्तत्व हीनस्य प्रतीचो विक्रिया कुतः। प्रमायो गोहितो

र्हिचं प्रमाप्यात्मैव नः सदा। वाच्याग्निवद्विकारो न प्रागभावाद्यसंभवात्। अग्न्यादीनां तु सांशत्वाद्भूतवह्नि
स्यादिंधनैः। अभिभूतस्वरूपाणां काष्ठनिर्मथनादिना॥ युक्तैवाविष्कृतिर्नित्यं तेषां कार्या मकृत्वतः।
नत्वात्मनो निरंशत्वान्मुख्यो संभवतः क्वचित्। आविर्भावतिरोभावो स्वतः सिद्धेश्च कारणात्। अव्यक्त
पिताप्यभिव्यक्तिर्नाभिव्यंग्यस्य विक्रिया। यथा तथाऽनभिव्यक्तिः सर्वेषामपि वादिनां। अतो न स्वरूप
गच्छति र्मुक्तौ कर्त्रादिरात्मनः। अविद्याकल्पितो ज्ञेयो न ह्यसौ परमार्थतः। कर्त्रादिभावस्य प्र
त्यक्त्वाल्लं तदात्मनि मात्रादिबोधकं मानं प्रत्यगात्मनि साक्षिणि। न व्यापारयितुं शक्यं वह्निर्दग्धमि
वोल्मुकं। साक्षिसाक्ष्याभिसंबंधः प्रमात्रादौ यथा तथा। साक्षी वस्तु निर्वस्या केवलानुभवात्मनि।
परार्थसंहतानात्मयोग्यकर्त्रादिबोधिना॥ विरोधाच्च द्विरूपोऽर्थः प्रसज्येत कथं। इच्छाद्वेषादिरूप्ये
वं नात्मनो धर्म ईष्यतां। कामः संकल्प इत्येवं मनो धर्मत्वसंश्रयात्। स्वपरोभयहेतुत्वे त्वनिर्मोक्षप्रसं
गतः। सम्यक्षिरूपणे चैषामविद्याकार्यता वदेत्। इच्छादीनां स्वहेतुत्वेऽनर्थं कुर्यात्कथं स्वयं। आत्मज्ञान
न्यथा शत्रो रात्मनो तो न यज्ञो तो तथा परनिमित्तत्वेऽनर्थस्यापरिहारतः। नैकांतिकफलत्वं स्याद्रोगादि
परिहारवत्। मरणे संहरतिं यत्नैः परिहारः कुतो हरेः। तथा भयनिमित्तत्वे नैकांतिकफलोदयः। परा
भिप्रायानिमित्तत्वे वस्यानोक्षानिश्चयः। निर्हेतुविद्याकृतौ तु दोषः कश्चिन्न विद्यते। तद्वर्जनस्य सं
सिद्धेः प्रसिद्धोपायसंश्रयात्। परागर्थप्रमेयेषु या फलत्वेन संमता। संवित्सैव हमेयार्थो वेदांतो
क्ति प्रमाणतः। अप्रामाण्यप्रसक्तिश्च स्यादितोन्यार्थकल्पने। वेदांतानामतस्तस्मान्नान्यमर्थं प्रकल्प
येत्। नच्चेवमपि मानस्य व्याघातः स्यात्क्रियाविधेः। वेदांतेषु पुनाश्वासस्ताथाव प्रसजेत् क्रवं।

।५।।

ॐ२

लं ... वाणश्च। मनोराज्यसमं मन्ये सर्वमेतत्त्वयोदितं। न चास्येष्टियतः साक्षात्तत्फलं ज्ञानतः फलं। ष्टता
दृप्येनचेद्वाक्याज्जायेत फलवन्मतिः। आशंक्येत तद्देवैतावदेतत्कृतत्वोदितं। निःसंदुष्कृत्य विज्ञानं वाक्यात्कृत
तिनान्यतः। वाक्यार्थस्याप्तिश्च ज्ञानं पदार्थस्मृतिपूर्वकं। अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवं। एवं निर्दुः
खमात्मानमक्रियं प्रतिपद्यते। सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा न वेत्। दशमस्त्वमसीत्यस्माद्यथैवं प्रत्य
गात्मनि। अमाद्यशंका सकृत्कामातरेण्यो विरोधतः। वक्ष्यते तत्र यत्नेन श्लोकसिद्धोपपत्तिभिः। चतुष्पान्मा
निरासेन साक्षाद्ज्ञानफलं ततः। नवसंख्याहृतज्ञानो दशमो विभ्रमाद्यथा। न वेत्ति दशमोस्मीति वीक्ष्यमा
णोपि तान्नव। अपविद्धद्वयोप्येवं तत्वमित्यादिना विना। वेत्ति नैकत्वमात्मानं प्रत्यक्षो हा प्रबोधतः। कुतुस्ता
च्छेदि नैवास्य सदसीत्यादिना ... प्रतीतिप्रतिपत्तिस्या ... ज्ञानबाधया। निःशेषकर्मसंन्या। सोवाक्यार्थ
ज्ञानजन्मने। तस्या रोदुपकारत्वात्सहायत्वोपकल्पते। त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमं। त्यजतैव
हितत्द्वेयं त्यक्तुः प्रत्यक्परं पदं। शांतो दांत इति तथा सर्वत्यागपुरःसरं। जपायमात्म विज्ञाने कृतिरेवाव्रवीच्छ्रु
यं। प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं। तस्माज्ज्ञाने पुरस्कृत्य संन्यसेदिह बुद्धिमान्। मुमुक्षुर्विद्यते ता
देवामोहेनापि दधुर्नरान्। ततस्तो कर्मस ... ः प्रावर्तीताविपक्षणाः। अतः संन्यस्य कर्माणि सर्वाण्यात्मा
वबोधतः। हत्वाऽविद्यां धियैवेयात्तद्विष्णोः परमं पदं। इतिज्ञाद्भुविज्ञास्वार्थं श्रुतिवाक्यमधीयते। सर्वकर्मनि
स्मा रासेन तदात्माविर्योजनिः। सत्यानृते इति तथा सर्वसंन्यासपूर्वकं। आत्मनोऽन्वेषणं साक्षाद्दापस्तंबोऽब्रवीन्मु
निः। नाविरतो दुश्चरितान्नाशांतो नासमाहितः। नाशांतमानसो वापि प्रज्ञानेनैनमाप्नुयात्। वेदानुवचनादीनां
विनियोगक्रियातः। भिन्नाधिकारिनाविंगं कर्मविज्ञानकांडयोः। ज्ञानोत्पत्त्यादिकांक्षिगादातस्तो हेतुमात्र
कं। णम्यते नाविशेषात्तः कर्मैवेति नगम्यते। मुंडो परिग्रहो संगो बहिरंतः शुचिः सदा। ब्रह्मन्नयापजवैति परिव्रा

द२

(7)

सर्ववेदान्तविषयमन्यथा तद्विरुध्यते। न तत्र कारणापेक्षा नेतिकर्त्तव्यता तथा। यत्र यत्रात्मभावेन भ्रान्त्या ब्रह्मा
वबोध्यते। इतिकर्त्तव्यतादानं करणादानमेव च। तत्र तत्र विधिः स्थानेप्सितस्य फलेच्छया। आत्माशेषपुमर्थ
स्य त्यक्तानर्थस्य स्वतः। अनात्मनीवनेकेयं कथंचित्स्यादिहात्मनि। तन्निवृत्तौ निवर्त्तेत इतिकर्त्तव्यसाधने।
निरंतरायता शेषपुमर्थस्यात्मरूपतः। नवांशात्रयपस्त्वन्ये रूप्यभावनेष्वापरीक्षकैः। भावनातो नयान्यत्र विधिर
व्यपगम्यते। यो हि मात्रांतराधार्या मुक्तावस्था यथोदिता। एकदेशो विकारो वा संसारी चात्मनो यदा। किं तदाप्त
क्तमार्गेण मुक्तिः किं वा क्रियाश्रया। निवृत्तावेव निःशेषसंसारस्य तदापि किं। आगन्तोरपि कारः स्यान्नाप्रवृ
त्तौ कथंचन। आत्माज्ञाननिमित्तस्य तत्त्वन्यत्वानुपपत्तितः। तदाप्यविद्याविध्वस्तावपि कारो न कर्मणि। कर्त्त
व्यावृत्तावनुरक्तेऽपि विकारेऽपि न कर्मणि। कारणे कथं संपन्नौ स्वतः सिद्धत्वहेतुतः। मृदापत्तिर्घटस्येव विकारस्या
त्मनो ध्रुवौ। अविकारात्मसंपत्तिः सा च तत्त्वावबोधतः। कार्यकारणयोर्भिन्नौ कार्यकारणता कुतः। अभिन्नौ च त
योरैक्यात् कार्यकारणता कुतः। विज्ञानात्म विकारस्य कारणे कथमुच्यते। स्वतस्तस्य च संसिद्धेः कार्यता नोप
पद्यते। कर्मतो नर्थकं मुक्तावेकदेशविकारयोः। अप्यनर्थाय कर्म स्यात् क्रियमाणं न मुक्तये। प्रतिकूलं विमु
क्तेश्च क्रियमाणमसंशयं। कर्मरक्तेऽततेनैतन्मुक्तौ कर्म निरर्थकं। विकारोत्थं तत्संभिन्नो यदात्मु स्याद्विकारिणः।

व

तदापि विकृतेर्नाशो मुक्तिरित्यभिधीयते। अत्राप्यनर्थकं कर्म तत्फलासंभवतः। कर्म वज्ञानमप्यत्र फलाभावा
दनर्थकं। नैवाविद्याकृतैवासौ वासनावी यदि चेत्स्मृतिः। स्वरूपनाशदोषस्यादेकदेशेपि पूर्ववत्। यदा त्वविद्ययाध्य
स्तः संसारित्वं न वस्तुतः। विकारेवयवे चैव तदाप्तं नैर्फल्यमेव तु। पक्षौ निर्विकल्पीयः स्यादस्माकं मतः। सर्ववाधावि
रोधीय नातो विधिरिहेष्यते। तदाहि किल्मनाः सर्वविकारावयवादिकाः। दृष्टैव मात्मविद्यैव सर्वाः संपादयिष्यति।

रेफि

पूर्णं निश्रेयसं न तस्मान्तर पूर्णमविद्यया। आत्मा स तेऽमृतैवात्तो यथार्त्तात्मविद्यया। ध्वस्तस्तायामविद्यायां पूर्णमे
वावतिष्ठते। अनर्थको विधिस्तस्मात् सर्वो निःश्रेयसं प्रति। इत्येतन्न्यायतः सिद्धं यतु प्राक्प्रोदितं वपा। आम्नायस्य क्रि
यार्थत्वादित्यत्रापत्तिर्धीयते। तत्राम्नायाभिधानस्य त्वाम्नायां शाभिधानतः। विध्यकानां क्रियार्थत्वं सिद्धं हेतु
तयोच्यते। क्रियाप्रकरणस्थानां विधिशेषात्मनां सतां। वचसामक्रियार्थानामानर्थक्यायतद्वयः। न तूपनिषदां
न्याय्यं पार्थगर्थ्यस्य संभवात्। पूर्वोक्तेनैवन्यायेन नातस्ताद्विधिशेषता। विधिनाचैकवाक्यत्वादियं ज्ञापियोच्यते।
तेषामेवं तदप्यस्तु तदानर्थक्यवारणात्। ननु वेदान्तवचसां दृष्टार्थत्वेन हेतुना। तेष्वपि दृष्टः पृथगर्थत्वमुक्तमेवाति
विस्तरात्। अन्यार्थानुपपत्तेश्च वेदान्तवचसां तथा। अर्थैकत्वगतो सत्यां वाक्यभेदं प्रकल्पना। न न्याय्यास्ते ति दृष्ट

॥८॥

त्वाद्वेवस्यत्वादिवाक्यवत्। यथैवं पृथगर्थत्वं गतो भिन्नवचस्ततः। शेषत्वादिषु नन्याय्ये कार्यकल्पना। ज्ञानका
ण्डार्थशेषत्वं कर्मकाण्डस्य यत्पुनः। विनियोजकहेतुत्वे तत्तपोवकैकवाक्यतः। न्यायेन वक्ष्यमाणेन नहि योप्यतस्य वक्ष्यतो
पार्थगर्थ्यमतः सिद्धमपास्ता विधिलक्षणं। सर्वोपनिषदां त्वात्मज्ञानं कैवल्यसाधनं। निःशेषवाङ्मनःकायप्रवृत्तेः
परमात्मिका। ताभिश्चात्ययहविज्ञेया यथोक्तन्यायवर्त्मना। अपि कारोपितस्यार्थसिद्धोशेषक्रियात्यजः। जिज्ञासोरेव
कर्तुस्तन्न सिसाधयिषोः सदा। श्रवणात्मतत्त्वव्युत्पत्तिमात्रेणाप्यधिकारिता। नवत्येवात्र जिज्ञासोरङ्गस्यापि मुमुक्ष
तः। मैवप्रक्रमसंहारपर्यालोचनया पुरा। वेदस्यैकार्थतात्पर्यमेकवाक्यतयोदितं। तेन निःशेषवेदोक्तकारिणा
चाधिकारिता। सिद्धे त्वनेकवाक्यत्वे कल्प्या भिन्नाधिकारिता। मेवं भिन्नैकवाक्यत्वे प्रागसमाप्तिः समर्थितेति तत्रश्च
न च दुष्करस्यैवोच्यते स्यैहनसंभवे। नापि निःशेषवेदार्थमनुष्ठातुं क्षमो नरः। पुमापुमापि येन स्यात्सज्ञानेऽधिका
रिता। संपदो याथार्थ्यवादत्वे तेन वेदान्तगोचरे। ज्ञानेऽधिकारिणो जातौ प्रामाण्यं चिप्यतेस्वतः। किंच मानादविज्ञाता
विमुक्तिः काम्यते न या। ज्ञातायां स्यात्स्वरूपत्वात्फलतरां नास्ति कामना। न फलं कामना मुक्तौ पुंसां नास्तीति नाक्षितुं। दे
शाकालानवच्छिन्नस्तरस्वाच्च्वर्धितदर्शनात्। किं यज्ज्ञानमदृष्टार्थमग्निहोत्रादिवद्यदि। ततोऽधिकारचिंता स्यात् दृष्टे तेप्य

न२

फलत्रांकथा। क्वापि नाप्यग्निहोत्रादिभ्य इष्टेष्वाधिकारिणां। कृतमप्यफलत्वं तेन यत्नात्तत्र निरूप्यते। आवे

व्यावसमर्थ [illegible] परमपुमर्थत्वबिनः। पुमर्थस्याधिकं शास्त्रात् किंचिदत्र तु नार्थ्यते। कुतस्तज्ज्ञानमिति चेन्नाहि बंध

परिक्षयात्। असावधीयवृगोवा ज्ञानी वा वर्तते यथा। अधीतवेदवेदार्थोऽप्यत एव न मुच्यते। हिरण्यनिधिदृष्टांत

दिदमेव च दर्शितं। भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे।

इत्यादिनापि विज्ञानं नादृष्टार्थमितीरितं। दृष्टादृष्टार्थसंबंधि प्रीत्युत्कर्षविशेषतः। नानंदादन्यतो मुख्या तृ

प्तेर्दितः पर्यवस्यति। किंतु साधनसाध्यत्वादनित्यं कर्मजं सुखं। अनित्यं जनकं तत्र सूक्ष्मो [illegible] नास्ति योगमतः।

॥३००॥ संस्कारमात्रकारित्वं सर्वेषामपि कर्मणां। ज्ञानकांडप्रवेशो वा तेषां नार्थांतरं ततः। एवमप्यैकवाक्यत्व

नानुष्ठेयसमाप्तितः। असार फल स्वं प्राप्तिः पुमर्थो नेष्यते यतः। इष्टया साधयन् प्रीतिं न प्रीतिं वविच्छति।

प्रीतेः कृतः प्रकर्षोपि स्वर्गस्वाराज्यभेदतः। नापि प्रीतेरियत्तायाः स्वर्गशब्दोस्ति वाचकः। न याज्ञान रूप

साध्यर्थं विधानकश्चित्प्रवर्तते। प्रीतिर्या काचिदिष्टा चेत् स्वर्गशब्देन गण्यते। विश्वाग्निष्टोमयागादेः पश्वा

दिफल संकरः। विशेषो वांछितश्चेत्स्यात्तु पश्वादिकपाधितः। न तावत्सत्त्वे सर्गेज्ञाता पाधिवियोगतः।

तुष्टो काम्यफलेष्वीहे सत्कारण एव च। अनवच्छिन्नरूपायाः प्रीतेराशीतोकृतार्थता [illegible] वाले परीक्ष्येति तथा

ता च दृष्टेति च। कर्मण्यो निवृत्तिर्नास्तीत्यादिवाक्ये प्रदर्शितं। प्रत्यक्षश्रुतिविध्यंतविहितानामकारणात्॥

स्या। जातिसाहसं मन्ये ननु यागादिकर्मणां। प्रत्यक्षोपनिषद्वाक्यविहितायास्तथोपि तु। एकास्य ज्ञाननिष्ठा

[illegible] त्या। [illegible] तीव हिसाहसं। विचार्यमाणे यत्ने न त्वधिकारे यथाश्रुति। न किंचित् साहसं चेत् प्रत्यक्षश्रुतिवा

[illegible] परविनिगमस्य प्रसिद्धेरेव कारणात्। तस्मात् सिद्धोधिकारोत्र ब्रह्मरूपविविक्षितो। तस्यास्य

[illegible] ति नाप्यहृत्। प्रतिज्ञायापि संबंधं कस्मात्तन्नोक्तवान् स्फुटं। अपि धीयते इत्यादिव

9

विज्ञानकर्मणोस्त्वेकाधायकत्वे तत्समुच्चयः। पूर्वोत्तरैकात्म्यतात्पर्यविदस्यासौ न कल्प्यते। एकवाक्यावशीनाव-
सीध्यैकवायोगतस्तथा। समुच्चयः कुतोऽत्र गुणवज्ज्ञानकर्मणोः। भेदाभेदाश्रयत्वेन नैकात्म्यज्ञानकर्मणोः। पर-
स्परोपकारित्वहानात्किं तत्र समुच्चयः। देवताद्ययाथात्म्यज्ञानं कर्माङ्गमिष्यते। तावदेव हि तत्कर्म नाज्ञातद्रव्यदेवतं।
तद्विशेषेण न्यूनस्यात्तथा न्यूनस्य मित्यतः। समुच्चयो न तस्य स्यान्नतो नोऽपि समुच्चयः। यथापैकात्म्यविज्ञानं
तदज्ञानैकचस्मरे। तस्मिन्सति कुतः कर्म कापि द्वास्य गम्यते। ब्राह्मणत्वादिविज्ञानमग्निहोत्रादिकर्मणी
यद्दृष्टसाध्यसिध्यै तु कर्माङ्गत्वमेव तत्। ऐकात्म्यवस्तुयाथात्म्यबोधे जात्यादिबाधनात्। न केवलं क्रिया
न स्यात् कर्मणां प्रयक्ताऽक्रिया। अयथावस्तु सर्पादिज्ञानं हेतुः पलायने। रज्जुज्ञानेऽहिधीध्वस्तौ कृत-
मप्यनुशोचति। न कर्मव्यापृति युक्ता वाप्यादीनाम ज्ञावतः। न यत्कृत्यादयस्तत्र तेन स्यान्न समुच्चयः। अं- ॥१०॥
तरंगं हि विज्ञानं प्रत्यगात्रैकसंश्रयात्। बहिरंगं तु कर्म स्याद्बाह्यद्रव्याश्रयत्वतः। सत्यंतरंगे विज्ञाने बहिरंग
न सिध्यति। संस्कारकं तु कर्म स्यात् ज्ञानोत्थज्ञाननिवृत्तिः। यथावस्त्वात्मविज्ञानं मोहमात्राश्रयाः क्रियाः। स-
म्यग्ज्ञाने कुतः कर्म कर्महेतुप्रमर्दनात्। नित्यप्राप्तं विज्ञानं प्रतीचः संनिधेः सदा। कर्माभिदृष्टरूपं नित्यं वा
नित्यबाधकं। द्वयी कर्मणि तौ लोकः स्वराड्भावबोधतः। ज्ञप्तौ त्रैलोक्यराज्येनाप्तिर्हि माद्रियते कुतः।
भिन्नप्रकरणं ज्ञानं कर्महितार्थं कर्मणा। विरोधाच्च स्वतन्त्रं तद्गुणत्वं न कस्यचित्। यतो वस्तु तु रोध्येतन्न
ज्ञात्वराऽवर्त्यतः। अज्ञानोच्छित्तये ज्ञानं स्वतन्त्रं तेऽगण्यतो। अनावृत्तिश्च कर्मभ्यो न क्वचिच्छ्रूयते स्फुटा।
ज्ञानादेव त्वनावृत्तिः श्रूयते बहुशः श्रुतौ। एकरूपं च विज्ञानमेकरूपाप्रमेयतः। भिन्नरूपाणि कर्माणि
बहुकारकसंश्रयात्। एकरूपस्य मोक्षस्य भिन्नरूपं न साधनं। एकरूपस्य मोक्षस्य ह्येकरूपं हि साधनं।

पिव

तस्मात्कर्मफलं नाना नानाकर्मसमुद्भवं। देवमानुषतिर्यक्त्वं कर्तुः शास्त्रे निदर्शितं। अन्ये तु मन्यते के
विकजीरन्यायवादिनः। ये दृष्टा लिङ्ग्यो वेदगम्य तेक स्यचित्कचित्। देहात्मभावविलयः स्वर्गकामप
दे यथा। देहाद्विलोधिकार्य्यत्र स्वर्गभोगयः ऽवगम्यते। गोदोहनेनेत्यत्रापि विलयेन्याधिकारिणः। अ
धिकृतधिकारस्यान्यान्यापि क्रियतेयतः। रागाद्युपवृत्तौ नानिषेधेषु लयो जसा। विधिषु पिलय
स्तासां कार्यांतरनियोगतः। लोकैर्यानन्निषेधात्पथः सा त्वान्निवारणे। मार्गांतरोपदेशाद्वा वेदेष्वेवं
प्रतीयते। एवं रागादिहेतुकप्रवृत्तिलयवर्त्मना। आत्मज्ञानाधिकारार्थानिःशेषाविषयः स्थिताः। नेत
देवं यतो शेषान कर्मविषयः श्रुतो। खवाक्यावगता कार्यादपेक्षातो। फलांतरं वेदनुष्ठानतात्पर्यातून ल
यो गम्यते क्वचित्। फलभ्यते स्ताचाहि साध्यस्यादफलः कथं। वस्तुनो वगतिर्नापि लयोद्भवपतिकृत्र
पु विकृ। अज्ञावेपुपपन्नत्वात्सर्वतैयाण्नीक्षणात्। स्वाभाविकः प्रपंचश्चेत्सनिरोद्धुं न शक्यते। कार्यश्चे
कारणोच्छेदे कार्योच्छेदः स्वतो नहि। कृत्स्नप्रपंचविलयः कर्तुं शक्यो न केनचित्। सेंद्रियादिलयः स्यापि
स्यत एव न शास्त्रतः। नष्टितस्य पुनर्जाता दृष्टच्छेदो थ शंक्यते। आयात स्वार्हनाश्चासस्त्वदृष्टौ गतावपि। प
प्रपंचनाशाने नाथनाश्यते येन कारणे। नैवं न कार्यनाशेन कारणं नश्यति क्वचित्। कारणस्याप्यविद्या
यावस्तुबोधाद्विनाशतः। यतो नो ऽविद्यानाशार्थं प्रपंचविलयोफलः। रज्जुज्ञानाद्धि सर्पादिप्रपंचविल
यायतः। सर्पनाशसलये पीयं रज्जुस्तुमसि नेष्यते। लयनिष्ठे प्रमाणेनो वस्तुगोचरतेद्वतः। अथ वस्तुनि
तन्माने न लये स्यान्नयद्वये। नाव्यचेत्कर्म शक्यास्तो न तो फपरतःस्वतः। प्रपंचो वर्त्तमानस्तु कार्यत्वान्न
श्यति स्वतः। श्रुते विलयतात्पर्ये फलमाकस्मिकं भवेत्। फलार्थाश्चेद्धेतुयेन स्यान्नोत्र

यंवाक्यजे दतः। प्रपंचविलयनेनैव सर्वानर्थप्रहाणतः। पुरुषार्थस्य संसिद्धे विधाने: फलव्यमापतेत्। अत
देकाम्ययाथात्म्यज्ञानादज्ञानहाननतः। सिद्धे पुंमर्थे विलयकल्पनानिःप्रयोजना। स्वकार्योपेक्षयादेव विधी
नांच परस्परं ॥४००॥ कुतएकाधिकारे त्वमपेक्षाज्ञावतोवदा। विधीनां यापि सर्वेषां निबंधवचसांतथा।
नामादिलयनिष्ठत्वे स्वरूपे तेप्रमाणके। अनिमित्तोपवर्गोपि शास्त्रं येवमनर्थकं। स्वर्गादिकार्यमार्गेण
मन्यसे यदिकर्मणां। सोपानपंक्तिगत्येव हर्म्यहस्तादिरोहणं। आत्मज्ञानाधिकारानुप्रवेशित्वं भविष्यति।
यथैव नगराध्वस्थग्रामगत्यपदेशनं। नगराध्वोपदेशस्य शेषत्वं प्रतिपद्यते। नाकामितत्वाद्ग्रामादिगते
र्यत्त्वेवशेषता। स्वर्गादेर्नतु शेषत्वं पुरुषार्थत्वहेतुतः। अथोपच्छंदनार्थानि स्वर्गादीनि विमुक्तये। नगरा

प्तौतदध्वस्थग्रामादिगुणगीरिव। नैवं मंतरतः सिद्धेर्वाक्योतसमंजसं। वेदेतु वक्तृजाकत्वाद् दृप्ति प्रा
याद्यसंभवः। यद्यातत्रैव तात्पर्यं यत्रोपच्छंदनीयते। नगराप्तौतु भीजावात् प्रयतेतपुमान्कुतः। यदापि
वस्तुवृत्तेन नगरावाप्तिसाधने। ग्रामाप्तिर्नगरप्राप्तिस्तादाप्यथन्निमानतः। अर्थादपि न तात्पर्यं द्रव्यार्जने
विद्वेरिव। शब्दमत्रानुसारेण वेदतात्पर्यधीर्यतः। स्वर्गादौ यदितात्पर्यं नस्यादेकात्म्यबोधने। मुक्तोयेन्न
त्वेस्वर्गे वाक्यजे दान्तव्यये। नवस्वर्गादिकार्याणांश्रयाजार्थसमानता। अनुप्रवेशः कल्प्येत येन का
यंतिरंप्रति। वक्तव्यंच कथंत्वेते दृष्टेनैवोपकारिणः। आत्मज्ञानाधिकारस्य यदितावदिदं मतौ। रागाद्यावि
प्तदृष्टार्थप्रवृत्तिप्रतिषेधतः। अस्त्वेवं प्रतिषेधेषु निवृत्तेरुपकारतः। विधयस्तु कथं रागं निरुंधंति हिज
ण्यतां। नहिते परिसंख्यार्थानाप्तियेनेनियामकाः। अत्यंताप्राप्तमर्थं हि विधयोबोधयंतिनः। प्राप्तार्थोयो
विधिः सोन्यानिवृत्तिफलउच्यते। सेवासांग्ररूणीहवत्तुल्यकार्यतयोनच। यतोऽनियतकालीनफलं।

॥११॥

विधौ क्रियेष्यते। अदृष्टादिदृष्टार्था रागात्कृच्छ्रप्रवृत्तयः। ग्राम्योपाये न सेवायाः सांग्रहण्याविरुद्धता।
क्रियातः फलमित्येवं शास्त्रमेतावति श्रमा। क्रमेण युगपद्वातः सेवासांग्रहणीष्टयोः। नानुष्ठाने विरोधो
स्ति फलं न मार्गिनः कश्चित्। रागात्कृच्छ्रप्रवृत्तीनां कौतूहलं नियं निरोधतः। नैयोगिकोऽपि नैवास्य ईप्सितो
वाप्रवृत्तयः। इष्टादृष्टस्यानुष्ठानेन विरोधोऽस्ति कश्चन नानुपायत्वेन कामानां रागाद्यावच्छिन्नहेतुतः। प्रप
चाज्ञिनिवेशित्वहेतौ तुल्यमितीयानयोः। कं विशेषमपेक्ष्यैकाचेष्टानुष्ठानुरोधिनी। कामोपायत्वमेवाथ
नेष्टयदि च कर्मणां। उक्तोऽन्यायः प्रतीयेत फलं यां कस्मिंश्चिद्भवेत्। सर्वकामाप्तानेनाथ कृत्स्नकाम
व्याप्ति ना। यान्ति मुक्त्यानुरूपं वेदि चयो वा नेमे वतत्। यन्निमित्ता प्रवृत्तिः स्यात्सा कथं तन्निवर्त्तिका।।
प्रवृत्तोऽपि निवर्त्तेत न कामोपायकर्मतः। उद्दिष्टनाथवाञ्छानात्सर्वपुंभोगयश्च सोरात्। अपि वृत्तावने
भून्य इति कामिवचस्तथा। उक्तं यद्यपि वेदस्मिन्कस्यचिद्विद्वयः क्वचित्। तन्नातत्परतस्तूक्तेर्न देहादि
व्यवस्थितेः। कृतेऽपि स्वर्गतात्पर्ये कल्मनाप्ये दृश्येऽथतः। तन्न प्रसक्तवचनाद्देहादिव्यपसिद्धितः। सा
ध्यहस्तीनिदृष्टेऽपि नहि हस्तीपरानुमा। अस्थूलादिवचः साक्षाद्देहादिप्रतिषेधकृत्। विपर्ययेणाये
प्याकूर्यथोक्तज्ञानकर्मणोः। एकाधिकारितां वाच्यं मानं तैर्न संगतौ। न तावत्क्रियेहास्तीदीस
दिष्टो लक्षणे यथा। प्रकृतात्पूर्वसंबंधलक्षणापरतः स्थितेः। श्रीहित्राब्दस्याहिंस्वरूपकुनिरर्थकं। प्रकृता
त्पूर्वसंबंधबोधये दितिकल्प्यते। नापि वाक्येन संबंधोऽङ्गं पर्णमयीव वत्। अङ्गादोऽव्यभिचरितकर्मसं
गतिकारणात्। विनापि प्राक्रियां तेन कर्मोपस्थापयेत्कथं। वाक्ये नैवाज्ञिसंबंधसौत्र तस्येति वर्णितो। आ
मज्ञानं तु नैवं स्यात् न तत्प्रकरणे श्रुतं। नापि चाव्यभिचारित्वमात्मनः कर्मणोच्यते। तेनास्य कर्मसंबंधो
नमानेनोपपद्यते। एवं चाज्ञातपारार्थ्ये नार्थवादः फलश्रुतिः। पृथगेवाधिकारो तो यथोक्तज्ञानकर्म

यथा

णोः। अर्थाक्षेपोऽपि योग्यस्य कर्तुर्नैकश्च कल्प्यते। न तु विध्वस्तभेदस्य स्यादौपनिषदस्य सः। प्र
स्य च वेदवचनप्रामाण्यापात्त्रयप्रत्ययतः आदौ संन्याससंसिद्धेः कर्मणा। नीतिश्च परस्मृतिः। न च केवल
कर्मभ्यो मुक्तिफलकोपपद्यते। तथा च वक्ष्यते स्पष्टमतो मुक्तिर्न कर्मतः। न चैकात्म्यपरिज्ञानमप्या
सापेक्षमिष्यते। मुक्त्यै भावनार्थं वा तथा चोर्ध्वं प्रवक्ष्यते। स्वतो ज्ञ वतः सिद्धेरैकात्म्या स्वस्व
वस्तुनः। न स्यात्सोपाधिकं ज्ञानमित्येतच्चापि वक्ष्यते॥ ॥अन्य आहुः पदार्थत्वात्प्रमाणान्तरगम्य
तां। आत्मनो नागमात्सिद्धिर्दीपाद्यन्यपदार्थवत्। अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तितः। विवि
च्यातः स्वमात्मानं प्रत्यक्षिज्ञानतस्तथा। मा व्यापारे समाप्तत्वाज्जन्यस्तादपेक्षतो। तद्वासनानिरोधेतः
मुमान्मूसानिपुद्यते। मनसो वा निरोधेसौ न तु वस्त्ववबोधने। मानान्तरेण तत्सिद्धेर्नात्र व्याप्रि
यते वचः। स्वयंज्योतिः स्वभावत्वान्निरूढस्योत वासनः। प्रमान्तरानपेक्षोपि स्वयमात्मा प्रकाशते। एवं
कार्यमुखेनैव ज्योतिष्टोमादिवोधयत्। वेदान्तानां प्रमाणत्वं नात्र वस्तुनीष्यते। वासनामात्रहेतुत्वा
त्मनो नर्थसंगतेः। अन्योपाये सत्यसति निरोधादेव मुक्तता। संभाव्यं नानपेक्षत्वं नियोगविरहात्क्वचित्।
शाब्दप्रवृत्तेः सिद्धेश्च न नियोगस्य संभवः। न च वस्तुनि मानत्वमुदाहरणमिष्यते। विधिर्तु णार्थस्तस्या
पि व्यापारविषयत्वतः। क्रियानुष्ठेयमौनस्य स्वार्थस्य पुरुषार्थता। सर्वत्र गम्यते वेदेनानुभूतेः कथं च
न। ततश्च प्रतिज्ञामात्रं शाब्दादिति नमानतः। प्रतीयमान एवातः पुरुषार्थः प्रसिद्धितः। अप्युपादीयमानं
च सिद्धं वस्तु न कर्मणि। पुमर्थसाधनं दृष्टमनिर्ज्ञातांगभावकं। अनुपादीयमानं च न च ज्ञातांगभा
वकः। आत्मान्येनास्य शेषत्वं विधिप्रत्ययपद्यते। उपासीत स्वमात्मानमिति साध्यद्वयः श्रवात्। तत्रा

॥१२॥

नवारेपत्फरितितदेतच्छ्रेय इत्यपि। निर्विकल्पेपि जगत्यस्मिन्प्रधानं नात्मनोऽपरः। न प्रमाता प्रमा
णांतरं वा क्रियापि परफलानि वा। प्राधान्यायेदकल्प्यंते नो हूरेव प्रधानतः। आत्मनः कर्त्रेव स्थापि
तोऽर्थमितिनिश्चयः। यतो तो परमप्येतकोऽर्थं विनियुज्यते। नातिवात्मातिरेकेण वस्त्वन्यन्मा
नलभिगं। संज्ञाप्यते यथाप्येतत्तथोदकं प्रवक्ष्यते॥ ॥अनादृत्य यथोक्तार्थं नियोगार्थैकरोगतः।
केचित्कार्यैकनिष्ठत्वं वेदांतानां प्रवक्ष्यते। कार्यैकप्रमानिष्ठत्वात्प्रमाणस्यागमात्मनः। कुतएकात्मनि
ष्ठत्वं वयायमुदितं पुरो। नहि तस्यानपेक्षत्वं सिद्धवस्त्ववबोधनात्। यतो मानांतरमितं सिद्धं व। स्थितिम
न्यते। शब्दसामर्थ्यनियमो लोकादेवावगम्यते। लोके मांतरसिद्धोऽर्थः कार्यार्थे ग्राभिधीयते। न प्र
वृत्तिनिवृत्तिभ्यामन्यस्य वयसोयतः। कश्चिदर्थोस्ति दृष्टो तो वस्तुनिस्यान्तमानता। संबंधो वगमो
नापि शब्दाकृतार्थवाचिनः। प्रवर्त्तकात्प्रवृत्त्यार्थ प्रत्ययो व्युत्पत्तिय तोततः शब्दस्य सामर्थ्यं प्रतीतेरव
धार्यते। कार्यैकविषयेप्येवं वाक्यस्यातः प्रमाणता। क्रियाकारकसंबंधो वाक्यार्थोपरोपीष्यते। अ
नुवादविसंवादा चोषाग्रुकेरमानता। मांतरानुपवेत्रीश्चकार्यस्य तु न शंक्यते। शब्दादेव हि कार्या
र्थप्रतिपत्तिर्न लोकतः। प्रवर्त्तनोवदन्नूशब्दः प्रवर्त्तक इतीर्यते। ज्ञापकत्वात्प्रमाणस्य प्रेरयत्कार
कोजवेत्। शब्दार्थप्रवर्त्तनाबुद्धो रागादिर्नेचशंक्यते। रागादिः प्रेरणाकारी प्रेरणाज्ञापको ध्वनिः।
आज्ञापितार्थनिष्पत्तौ वृत्तिर्वश्ये क्षणात्प्रजोः। रागाद्यर्थस्य या सिद्धौ कर्त्तुं वृत्तिर्न रागतः। स्वामिको
पप्रसादादि हृदयाकूतवेदनात्। नापि श्रोतुः प्रवृत्तिस्याच्छब्दात्कोपाद्यवेदनात्। क्रिडादयो न कोप
दःसमर्थं ते प्रतिपादकाः। मानांतरमिताः सेतस्तोहि पुंसा प्रवर्त्तकाः। घिगंगाद्य चन्निधानैस्तु लिंग

न्तैरिहेंगिताः। रागादयो नियोगस्य सिद्धौ विघ्नसाधनाः। अतएव च रागादिसंसृष्टोऽपि
विविच्यते। क्रीडाद्यर्थेऽप्रवृत्तेः फलको याति स्वार्थं विनायतः। ननु दानादिसंबंधमाहावाक्यानुमा
नतः। गच्छेत्सा चेक देशो क्रीडादेव प्रवर्त्तते। महावाक्यप्रयोगेऽपि पदार्थप्रविवेचने। पुं
वृत्तिस्तु दृष्टेयं क्रीडादेर्न नान्यतः। क्रीडादेरेव भ्रवणाद्यत्र रागाद्यसंभवः। बाल्यः प्रवर्त्तते
तत्र ज्ञायते प्रेरणार्थता। आहामानांतरेणासौ किं त्वनार्थो वगम्यते। शब्दाच्च ज्ञायतेऽज्ञातसं
बंधादिति विचित्रता। यद्वाऽनिज्ञातसंबंधोऽप्यर्थं शब्दः प्रबोधयेत्। को देषो स्मात्सु जनवतो येनो
पालंभ ईर्यते॥५००॥ यदा वगम्यते नान्यस्तद्दृष्टेः कारणांतरं। शब्दस्य गम्यते स्पष्टस्तादर्थः
प्रविविच्यते। अन्वयव्यतिरेकौ तु वाक्यार्थज्ञानपूर्वकौ। वाक्यार्थस्तु तदायत्तो नेयन्यत्तो वि
शिष्टता। कर्त्तव्यता विवक्ष्यैव च वाक्येऽप्यपि गम्यते। विवक्षापान कार्यत्वं शब्दार्थविषया हि सा। त
दशान्नतु शब्दार्थः सामिप्रवें प्रतीयते। अतः प्रैषादिसंसृष्टोऽप्यर्थः सिद्धो विवेकतः। शब्दोऽर्थोपा
धयोश्चेतो पुरुषार्थेयपातिनः। प्रैषादयो न शब्दार्था निचाने कार्यतामता। अभिप्रायवतो जावाद
भिप्रायानुपातिनः। शक्यंतेऽपि न वेदेषु कार्यं वाच्यमिति स्थितं। प्रयोगविधिशेषत्वात्तन्मूला एव
नाशयात्। वेदे प्रैषास्तु ये दृष्टा अग्नीदग्नीन्नीहरः। प्रैषादिभ्यो यथैवेयं निन्नाकर्त्तव्यते द्युते॥
शब्दशक्तिवशात्तद्वक्रियादेरपि वीच्यतां। नानिःपन्नस्वभावोऽपि भावः कर्त्तव्यतायतः। क्रीडादिश्च व
णात्तस्या अप्रतीतेर्लिङादिवत्। ननु काव्योपसंबंधोऽत्र कार्यबुद्धिविधातकृत्। नैतत्संदेहहेवात्रवि

वेकाज्ञावतस्तत्त्व। काल्लोपबंधः किंचात्र कार्यबुद्धिर्विघातकृत्। किंज्ञावाकार्यताज्ञिन्नाल्लिङादिर्यो
न ज्ञायते। कर्त्तव्यः कट इत्यादावव्यापारेऽपि कार्यता। वीच्यतेऽतः पृथग्ज्ञावात्स्वल्लाज्ञ प्राक्प्रतीतितः।
ननु कर्मणि कृत्योऽयं तयोरेवेति शासनात्। मैवं प्रेषादिवचस्मादुपाधिर्वादवोच्यता। प्रेषोदिरुपिक्ष
त्यानां तथा च स्मरणं मुनेः। कृत्यानां युक्तितोऽपि स्यान्नैव कर्माभिधायिता। यथा कटं करोतीति कर्ममा
त्रावबोधनं। कर्त्तव्यः कट इत्यत्र तथैवस्यान्नचेच्यते। कर्त्तव्यत्वादीष्टत्वसिद्धौ कर्मार्थल्लाज्ञातः। सा
क्षादनभिधानेन द्वितीयाप्रसज्यते (नत्वाभ्भो) त्तत्त्वकार्यत्वमज्ञिन्नं व्यतिरेकतः। इष्टेदेस्तव्यमित्येवं त

१४॥

त्रापि प्रत्ययोऽयतः। तस्मात्कर्त्तव्यतावेशात्क्रियावाचपदे वा फल्ल। कारकं वापि कार्यत्वं लभते नस्वतंत्र

॥१४॥

तः। लोकवन्नतु वेदेऽपि कार्यमात्रं न गम्यते। साधनेहानुबध्नस्य वेदकार्यस्य बोधनात्। तत्राप्यारोग्य
कामस्य पथ्यभोजनवाक्यवत्। मानान्तरप्रवेशो न साधने च तत्वं प्रसज्यते। अतः प्रेषादिलुल्लोऽयं त्रि
यापफल्लनिबंधनः। नियोगस्तु दसंवादाच्छित्रादौ तेविहन्यते। मैवं मानान्तरावेशात् लौके प्रेषाकृपा
चिकं। कार्यं प्रयोजनार्थाच्च प्रवृत्तिरिति कध्यते। साध्यसाधनसंबंधविषयत्वं पुमर्थतः। नियोग
स्यात एवात्र कर्तृत्वे न नियुज्यते। स च तएव प्रवृत्तत्वात्कर्तुरेवाधिकारिता। यदर्थारोग्यकामादिर्जवे
त्कर्तृविशेषणं। वेदेतु सकल्लाद्यादि प्रमाणागोचरत्वतः। साध्यसाधनताज्ञानं नियोगादेव ना
न्यतः। तथा स कारकः कामी स्वर्गकाम पदार्पितः। नियोगात्कर्मसंबंधे पथ्याद्यातीहकर्तृता। का
मस्य च प्रधानत्वात् तत्प्राधान्यान्नपायतः। पुंविशेषणता तस्मात्क्रोगी कामी न कारकः। अप्रद

ता प्रवृत्तोऽस्य कारकत्वं न प्रकल्प्यते। प्रवृत्तस्य णिचो क्रियाः स्यात्प्रयन्तं पाचयेद्यथा। अक्रिया कार्त संबं
धेन लुप्तषष्ठी प्रकल्प्यते। नैवं नाम्नोः सदा योगे षष्ठीयं शैषिकी यतः। क्रियाकारकयोगे च द्वितीयादि
र्लिङादि तु। स्यात्स्यादिति यदि कार्यस्य भावार्थे नेत्यसंकरः। नीलोत्पलेऽतु नामार्थाव परत्वाय परस्परं ते
द प्रेकात्मतो यो तावि विशेषात्वेन समता। लिङर्थे युज्यमानस्य कर्मत्वं न च कामिनः। अक्रियात्वान्नियो
गस्य द्वितीया चेत्कृते तथा। तस्मात्कारकः कामी स्वनियोगप्रसिद्धये। नियुज्यमान एवेह विषयं सा
ध्यमीप्स्यते। राजादिषु प्रसिद्धस्य नियोगः साध्यगोचरः। भावार्थस्य साध्यत्वमिति ते नापि युज्यतोऽअ
चिवादितमप्येवं लिङ्संख्यं विवक्ष्यते। पश्वादि विषयसिद्ध्यर्थं कारकादि यपप्तं। तत्स्य स्वर्गकामोयः
स्वनियोगं स साधयेत्। केनयागादिनिर्दिश्येते शास्त्रात्प्रतीयते। न याप नय न्यागः कामिनः स्वर्गकामि
तां साधनं स्यादधिकारस्य नवतीह कथंचन। अनुन्मृदीतकामोपी दिप्तर्वावस्थाऽविशेषतः। निष्पादि
ताधिकारोऽपि नियोगार्हः पुनर्भवेत्। अधिकारः स्वसिद्ध्यर्थमतः कामस्य साध्यता। यागेनापाद्यसं
सिद्धं विषयस्येति साध्यता। नानंतरस्य भावे विसंवादो नशांक्यते। क्रियया साध्ये फले सस्याद्गुड
र्थस्त क्रियासकः। प्रत्यर्थिनियशब्दे स्मिन्नाज्ञावानुपलब्धितः। मानाभावे त्वसौ मान मानं तर्पव
चोदितं। अतः कृताधिकारोऽपि यो विद्यादकृतार्थतां। तस्य शास्त्रानन्विशत्वान्नाधिकारोऽत्र वैदिके। मंत्रा
र्थवादनाम्नां च कार्यार्थानुप्रवेशतः। प्रामाण्यं न स्वतस्तस्मात्कार्ये वेदस्य मानता। वेदोतानामतो वाच्यं
कार्यार्थानुप्रवेशनं। प्रामाण्यं वा निषेद्धव्यमत्र प्रतिविधीयते। निःशेषमातृत वृत्तिजन्मनां तद्विलक्षणं।
स्वतः सिद्धात्मसंबोधव्याप्तिर्वस्त्वनुरोधतः। विपर्यस्तस्वभावानुरोधाद्देव नकारकात्। विपर्यस्त

15

तोत्पत्तौ कुंजस्येव दृष्टाधियां। घटदुःखादिरूपत्वं धियां धर्मादिहेतुतः। निर्हेतुत्वात्मसंबोधरू
पित्वं वस्तुस्वरूपतः। बुद्धितद्वृत्तिज्ञानबोधमज्ञानवध्यापन्नमात्। यतः सिद्धयते सोऽर्थो ज्ञेयः सिद्धः स्व
तः सदा। ननु प्रमाणविरहात्स्वतः सिद्धोय दीष्यते। वचसो बुद्धबोधित्वाद प्रामाण्यं प्रसज्यते। मैवमप्र
तिपन्नत्वादनुभूत्यैव वस्तुनः। तद्धस्तत्तोः पुरासाक्षादबोधोऽव्यक्तत्वमात्रतः। बोधाबोधोयतो
हृद्यो स्वानुभूत्यनुसारतः। दृष्टश्चानुपपन्नो चेत्किं बलादत्तिधीयते। स्वबुद्ध्यादेश्च संसिद्धिर्मात्रादेर्वि
रहेऽपि या। सापी हान्तरसंबुद्धमेयमात्रव्यपाश्रयात्। न चाज्ञानं व प्रमाणात्सा सति मातर्यज्ञानमा
मात्राद्यज्ञानवस्तुसिद्धिः कथं मात्रादिपूर्विका। यमप्रमाय मानानि नाना मानं प्रमिण्वते। वस्तु
रोधेन कथं तत्राप्रमाचनः॥ ॥अमीमांसक इत्युक्तो रमीमांसक इत्यतः। आक्षिपन्ति यदज्ञानात्त्वा
त्यानुत्तरं वचः। सर्वोऽपि वेद इत्यादि यथोक्तं परिहारं दृक्। उत्तरात्वचः स्पष्टं दृढन्यायोपबृंहितो। मान
स्वज्ञावमानि सर्वोऽपीत्यादि कदीरणं। कांडद्वयसमाख्याहि तत्तत्प्रमेयानुरोधतः। मानं हि यञ्जकं लोके
सिद्धे तञ्चस्वकारणात्। स्वतः सिद्धं यथा नित्यं मेयमात्रं विशिष्यते। अतः सर्वोऽपि वेदोयं प्रमाणत्वेक हे
तुतः। प्रकारान्तर पराङ्गमः सिद्धसाध्यात्मवस्तुनः। एकवाक्यत्वतो यद्वा सर्वोऽपीत्यादि नणपते। पुरुषार्था
वसायित्वाद्वेदाधीतिविधेरिति। निःशेषदुःखसंप्राप्तेः सर्वानर्थनिवृत्तेस्तथा। मुक्तेरवाप्युमर्थोऽन्यो न
दृकश्चित्समीक्ष्यते। असिद्धार्थस्य वा सिद्धिस्तु ज्ञात्येकमात्रतः। सर्वोऽपीति वचः सिद्धिः सर्वोऽप्यात्मैकसंवि
दः। यद्वानवगतो तोऽन्यः संभावो नास्म नस्ततः। सर्वोऽपीति वचः प्राहुः तथाचोर्ध्वं प्रवक्ष्यते। यद्धेतुकं
प्रमाणत्वं वेदानां समर्थ्यते। तेनैव हेतुना कर्मकांडस्यापि प्रमाणता। वेदांतानाममा

॥१५॥

॥१५॥

ता१

नत्वं येन वा हेतुनोच्यते। तेनैव हेतुना कर्मकाण्डस्यापि प्रसज्यते। अपि सर्वप्रमाणानि स्वप्रमेयात्तिसंगतेः।
प्रमामेव हि कुर्वंति प्रामाण्यं यान्ति नान्यथा। विधिनैवैकवाक्यत्वं पतो मंत्रार्थवादयोः। ततो दर्शननिश्चयं न त
यारूपपद्यते। अर्थवादे कृतो यापि प्रतिष्ठा कापि कल्प्यना। विध्यर्थसंगतावेव सापि नैव ततोन्यतः। विध्य
र्थशेषतावश्यं ततश्चार्थांतरोक्तितः। ऐकार्थ्याद्व्यसोशाक्या विरुद्धार्थकल्पना। विरोधे गुणवादः स्याद
नुवादोवधारिते। भूतार्थवादस्तद्धानार्थवादस्त्रिधा मतः। विधिशेषोपि यद्यर्थमर्थवादः समर्पयेत्। अधु
नविधिना क्षिप्ता वेदांता नेति कामितिः। प्रत्यक्षाद्यभिधाने न सर्वमानोपलक्षणं। मांतरं नागमादन्यद्वे
कल्प्यावबोधकृत्। सिद्धेन वगते यस्मात्पुरस्ताद्धा[illegible]तिर्भितेः। मानदज्ञाततासिद्धैः स्यादन्योन्यसमाश्रयः।
तद्येमस्यादिवाक्यस्य विरोधो तो न केनचित्। सर्वाश्रयत्वात्संवित्तेस्तथा त्वन्यप्रवृत्तितः। कृत्स्ने हार्थस्य संप्राप्तिः
कृत्स्नानर्थनुतिस्तथा। आत्मस्वरूपान्न न्यत्र संज्ञाव्यासादिमानतः। इत्येवमादि भाष्यार्थः क्रमेणैकात्मवस्तु
नि[illegible]यत्नेन वक्ष्यते न्यायात्पूर्वपक्षनिरासतः। वेदांतवचसां स्वार्थे प्रामाण्यं न विहन्यते। मानलक्षणस
क्षावाड्ज्योतिष्टोमादिवाक्यवत्। नैव कार्यैकनिष्ठानि व्यवहारे वचांसि हि। नियमेन प्रयुज्यंत इत्यत्रापि मिति
रस्ति ते। दिष्ट्या त्वं वर्द्धसे जातः पुत्रस्ते वर्द्धिमान्। इति नेदं प्रवृत्त्यर्थं वचो नापि निवृत्तये। सुखाद्युत्पत्ति
हेतून्निदर्शयंते कार्यवंत्यपि। वचनानि व्रज ग्राममित्यादीनि यथा तथा। सुखस्य धीति न ध्यानेन प्रवृत्तिरुपदिश्य
ते। सुखस्वीकार वनमस्यार्थानोपदेशाव्यपेक्षया। विशेषोस्ति प्रवृत्तेश्चेत्तात्पर्यं वचसोपि च। नैवं सुखादि सं[illegible]
तावर्थवचोपपत्तितः। आनर्थक्यप्रसंगादेवमुक्तादन्यत्र कल्प्यते। तात्पर्यं प्रोक्षणप्रकरणे न स्वतंत्रविधिका
रवत्। किंवोपाये प्रवृत्ताः सन्पुरुषोयं प्रवर्त्यते। ज्ञातोपायश्च यदा विधिनोपेयसिद्धये। तत्रैहतावन्नोपा

तोन

र्थतामता। न च प्रवर्तकत्वेऽपि वाक्यस्याङ्गीकृतेत्वया। त्राक्यो विधायिनोऽन्येषां पदानां वक्तुमन्वयः। किं स्वा
र्थमात्रनिष्ठत्वमुत कार्यैकनिष्ठता। पदार्थमात्रसंसर्गपरता किं न्विती र्यतां। स्वार्थमात्रावसायित्वे वा
क्यार्थप्रत्ययः कुतः। चेय्यर्थीय प्रयोगस्य व्यवहाराद्भवतः। पदार्थमात्रसंसर्गे कार्यार्थं विरहपिते।
व्यवहारस्य संसिद्धेर्द्वथा कार्यप्रकल्पना। कार्यैकव्यतिरेकेणैव वाक्याद्भूतानुवादकात्। प्रतीतिः स्यान्न
वाक्यार्थे स्याद्युक्ते र्व्यर्थतापि च। कार्यान्तरस्य चाज्ञाना कार्यै कार्याभिधायिनः। संबंधो न भवेदन्यैः सा
धनाद्यभिधायिभिः। कार्यत्वापि चेत्सर्वेषामपि चेत्परस्परं। पदार्थानाम संबंधोऽन भवेत्ताकृवेतू क
वं। नियोगो न प्रतीयेत विशिष्टविषयस्तथा। तत्कार्यैकपदार्थस्य नियोगः साध्यतामियात्। अथ सो माऽदिसंबंधे
पागादौ विषये मतः। नियोगः कस्तवः संबंधे हेतुरुच्यतां। सिद्धेऽसति विशिष्टेन विषये कार्यमिष्यते। अथ
क्रियैव त्वाकृत्यर्थसिद्धं नोयत्समीहितः। तदेतरत्तदर्थमित्येवं चेत्तसमंजसं। विषये यदि कार्यत्वं कार्यावगम हेतु व
कं। कार्ये कार्यान्तराज्ञानात् कार्यबुद्धिः कुतो न भवेत्। तदज्ञानादनुष्ठेयो विषयोऽपि न तत्र भवेत्। कार्यार्थतानतश्चेह
हीयेताप्रवृत्तिं विना। अथ कार्यान्तराज्ञानेऽप्यस्य कार्यत्वमिष्यते। विषयस्यापि कार्यत्वं स्वतएव न भवेत्तथा। विष
यो कार्यरूपत्वात्स्वसिद्धौ यत्नपेक्षते। कार्यं तदपि विषयमीहेता साध्यरूपतः। कोऽपि कार्यते वं च न बोधि
षय हेतुको। अन्योन्याश्रयताच स्यान्न च कार्यप्रधानता। पुंव्यापारव्यपेक्षायां स्वसिद्धौ कार्यमुच्यते। या
गादिः स यतो कार्यं स्वतः कार्यैकरूपतः। कार्यस्यैव न कार्यत्वमकार्यं कार्यतेष्यते। न त्वो क्रियाऽतुक्ततापत्तिः
पटादेः सा विधियते। घटकार्यं पटं त्यादि स्वस्वभावतया स्थितौ। सिद्धसाध्यादि भेदेन शब्देनाभिधी
यते। यदा तदा ध्वनेर्न स्यादज्ञातार्थावबोधने। विशेषः कश्चिदित्येवं न प्रवृत्तिर्विधेर्भवेत्। अवबुद्ध

स्व२

18

कुशब्दार्थे पुरुषार्थानुरोधतः। स्वत एव प्रवृत्तिः स्यान्न शब्दान्नार्थतस्तथा॥ साधनादित्रयाद्बाह्यं पुरुषा
र्थबहिःकृतं। कएतत्साधयेद्धीमान्किं वा रूपमितीर्यतां। न तावत्प्रेरणा कार्यं कार्यार्थविषया हि सा। नोतरा
त्प्रियप्रयत्नः स्यान्मानान्तरगतेस्तथा। न क्रियाकर्तृसंबन्धात्फलं नानिष्टरूपतः। कारकं नाप्यसिद्धत्वान्नाप्य
न्यदनिरूपणात्। न च कालत्रयास्पर्शानाच्यतं कार्यलक्षणं। घटशब्दो घटे मात्रलकाल्लास्पर्शो न कार्य
ता। नियोगोपि नियोज्यस्य व्यापारः स कथं भवेत्। अतीन्द्रियो लिङाद्यर्थः सिद्धत्वाऽस्य कथं भवेत्। सि
द्धिविषयसिद्धो चेन्नैवस्या कर्मणा नहि। आप्नुसत्यादिकं शाक्यमनारोप्य स्वभावतः। कार्यस्वे नाभिमना
॥११॥ सिद्धं पुमर्थं साधयेद्यदि। सर्वदा तस्य तादृक्त्वात्पुमर्थः सर्वदा भवेत्। पुंव्यापारप्रसिद्ध्यार्थसिद्धं स्वार्थकं ॥११॥
रमतीतस्यानाधेयरूपत्वान्न कदाचित्फलं भवेत्। संभाव्यमानसिद्धेर्हि यागादेः कार्यतामता। व्यापत
त्तु व्यापारस्यासौ ह्यातितां प्रसिद्धयोः। कर्तव्यो याग इत्येवं यागाद्भिन्नं यथेक्ष्यते। कर्तव्यं कार्यमित्येवं ततो
ऽपि व्यतिरिच्यते। कार्यं कर्तव्यता कार्यत्वेनैव भवातिरिच्यते। तस्मान्न वस्तुधर्मोयं शब्दादेव प्रकर्षतः। अ
तोयदेव साध्यार्थसाधनत्वेन गम्यते। वेदात्तदेव साध्यात्वात्कार्यं नान्यत्ततः पृथक्। लिङादिप्रेरणा
वाचीकुतः कार्यमितीर्यतां। विषयत्वेन नाक्षेपो भावार्थो विषयो मतः। प्रेरणापीत्वनैवस्याद्ज्ञातज्ञा
पनात्पृथक्। समस्तकार्यदोबाक्तिप्रसंगान्मित्य भावतः। न स्वरूपं लिङादीनां प्रेरणाज्ञापकत्वतः। अ
न्योन्यरूपत्वेदप्पि प्रेरणानुगमात्तथा। शक्तेरनन्निधेयत्वात्तद्व्यापारोपि नेष्यते। प्रेरकाभावतो वेदव्य
द्व्यापारोपि न प्रेरणा। अतः समीहितोपायतयावस्तु वबोधयत्। अतुष्टं प्रेरको वेदो ज्ञापना प्रेरणा मता।

तथा च वस्तुयाथात्म्यज्ञापने न प्रमाणता। न चैरकतया सा स्यात्स्वसत्त्वादेरनीक्षणात्। निष्पादितनि
योगस्य वेदप्रामाण्यतो यथा। नियमे न फलं तद्वत्साधनानुष्ठिते भवेत्। विसंवादोऽपि नाशंक्यो नियो
गार्थे यथा तथा। वैदिके चाप्युपायेऽपि नं तत्रैव व्याप्तिचारिता। नानंतर फलो यागो दृष्टो लोकेऽपि हि क्वचित्।
अतः सामान्यतो दृष्टं क्रियावादिस्यऽदूषणं। स्वसामर्थ्यविधाकामं कालास्पष्टं प्रभाषते। लिंगादियो
गमप्येवं वक्ष्यतीत्य विरोधिता। सोऽसादेवं च संबंधः साध्यसाधनयोर्भवेत्। नातिरिक्त लिंगाद्यर्थप्र
बंधानविडंबना। सोऽसादसति संबंधे पारंपर्येण युक्तिचित्। गतो सत्यां तदप्यत्र नान्यत्रैवोपलभ्यते॥
ऋत्याक्रयाप्तिसंबंधो व्यवच्छिद्येव साधने। अरुणः साधको दृष्टो नोनपेक्षोऽदृष्टवान्यसः। यागः कार्याभि
संबंधोऽप्युत्पाद्यफलं न ते। कथंचित्साध्यये कार्ये तच्च नाशीत्यसाधकः। नत्यान्यावृत्तिस्तस्य कार्यसि
द्धौ च येष्यते। फलानुत्पत्तितस्तस्मान्न कार्येणापि संगतिः। अथ शास्त्रप्रमाणत्वाद्दृष्टाप्युपेयते फ॰
लोत्पत्तिर्न आप्येवं तथा सति भविष्यति। मम शास्त्रप्रमाणत्वात्तथ्यादपि भवेत्फलं। एवं तु भवतो न्याय्यं
तद्भावे चेत्साधकं। कार्यसिद्धाफलाभावाद्वाविशेषफलसंभवः। औपाधिकस्य मिथ्यात्वात्साध्यसाधन
लक्षणः। व्यवहारः श्रुतेर्जातः परमार्थैकवादिनः। एवं च कर्मकांडेऽपि कार्यतावन्न युज्यते। एकात्म्येऽप्युप
थानास्ति विशेषेणाप्यते तथा। प्रतिपत्तिविधिस्तावन्नास्मादृश्यव्य इत्ययं। तस्य ज्ञो वाऽर्थनिश्चयात् व
स्त्वन्यनुपपत्तितः। सिद्धेऽसिद्धे च वैकात्म्ये विधिर्नैवोपपद्यते। नाकारो नापि तत्पुष्पेऽपि व्यापारानपेक्ष
तः। न विधिर्दर्शनेऽपि स्यादन्योन्याश्रयदोषतः। दर्शनाद्विधिसंसिद्धेर्विधेर्दर्शनसिद्धितः। न च यूपादि
वच्छक्यं वेदेनैव समर्पणं। ऐकात्म्यस्य संसिद्धेः साध्यत्वाक्पवरत्तनः। सिद्धं चेद्दर

वा — र्त्तिक।१

येद्वेदः प्रसिद्धं दर्शने तथा। तं न्तिष्टं यजवेद्वाक्यं व्यर्थताय विधेस्तदा। सर्वज्ञात्मेति वाक्यस्य नयवस्तु
न्यसंभवः। येनार्थस्यासमस्तत्वात् क्रियेताध्याहृतिः पदे। आत्मा ब्रह्मेति विज्ञानं विधिं नैव व्यपेक्षते।
यस्मात् तद्भूतवाक्यस्य स्वयमेवोपजायते। यज्ञेतेति विधिज्ञानं न विध्यन्तरमीक्षते। विध्यन्तरेऽनन
वस्थास्यान्नन्यायं कर्मणि स्थितेः। प्रतिपन्ने विधेयार्थे प्रवृत्तिः फलमिष्यते। प्रवृत्त्या च विधिज्ञानमेव
मन्योन्यसंश्रयः। बोधेस्मिन् लब्धतो जाते न प्रवर्त्यो फलत्वतः। अनुत्पन्ने च निर्तरां प्रवृत्तौ हेत्वसंभवात्।
अथ निश्चयसिध्यर्थं अनुत्पन्नेपि प्रवर्त्तते। स निश्चयो वः किं शब्दात् दथान्यस्मादितीर्यतां। शब्दाच्च दित
दे वेदमायातं पूर्वदूषणं। अन्यस्मिन्निष्यमाणे च स्यापेक्षत्वं प्रसज्यते। अविवक्षितमुत्यर्थमथात्र वि ८।
धिरिष्यते। अयं हि योर्थ इत्येको स्याद्विवक्षितधीर्यतः। नैव उत्सर्गतो यस्माच्छब्दानां लौकवेदयोः। ।।१८।
विशिष्टार्थैकनिष्ठत्वं स्वतो न विधिहेतुतः। अविशिष्टस्तु वाक्यार्थस्तथा लौकिकवैदिके। वाक्ययोर्ग
म्यते यस्माद्विधिनीतो विवक्षितः। अपिह्यार्थे काम्ये कर्मस्विव न लिप्यते वेदाधीतिविधेस्तस्मा
द्विधिरत्र निरर्थकः। विधेर्विध्यन्तरेणीहेक स्नोप्यर्थोप्यविवक्षितः। पूर्वोक्तेनैव न्यायेन नैव कल्प्यते
विधिस्ततः। मतं पुंमर्थसिध्यर्थं ज्ञानस्याविधिरिष्यते। फलस्य विध्यधीनत्वादुपेक्षा फलतान्यथा। इ
यव्याप्त्यतिरेकेण नाविज्ञानात् फलोत्तरं। ईष्यते कर्मवन्नातस्तदर्थं विधिकल्पना। यदपि मातरिफ
लं तदापि विधिना त्रांकि। मातृमान क्रमेपादेता सिद्धे विधिनाविना। अथापि कार्यविरहात् सिद्धार्थमनु
वादकं। वचो नैव प्रमाणं स्यात्तस्य मातरसंगतेः। विध्यर्थं भीकृतो वेदनपेक्षप्रमाणतां। अथ कौतोमं
तराज्ञावात् ज्योतिष्टोमादिवाक्यवत्। वस्तमोतरयोग्यं वे द्विधौ सत्यपि तत्तथा। अथ तन्मांतरायोग्यं

विष्यत्वेऽपि तत्तथा। किं वाक्यस्यानुवादत्वं सिद्धेऽर्थे मानांतरेण वा। आद्ये तत्र न पूर्वस्मिन्सिद्धेऽप्यर्थेऽनुवाद
ता। मानांतरानधिगतं सिद्धं वस्तु बोधयेत्। मानं किन्त्वानपेक्षं स्यात्पुमर्थस्य स्वरूपतः। पुंबुद्धिविषयो
ऽस्त्यर्थो मानांतरमपेक्षते। अन्यथा वस्तुरूपस्येह न तु सिद्धोऽपि वैदिकः। नो सिद्धत्वमात्रेण शंक्यते मांतरं
क्वचित्। शंक्यमानस्य मानस्य तुल्यासापेक्षतायतः। न च सापेक्षताप्यस्ति मिमर्नि तत्वतः क्वचित्।
मांतराववुद्धं हि बोधयन्मानमुच्यते। मानांतरानपेक्षं चेन्मानं मेयं प्रबोधयेत्। मानमेव तदा
तत्स्यान्नातोऽन्यन्मानलक्षणं। अथ मानांतरापेक्षं तन्मानं मेयबोधकं। द्वयोरेकक्रियावेशात्तथा
प्यन्यानपेक्षता। अथानधिगताज्ञावाङ्तरस्या प्रमाणता। तत्सद्भावात्पूर्वस्य ज्ञानस्यास्तु अप्र
माणता। मातोऽनधिगतत्वस्य सिद्धिः स्यादथवान्यतः। स्वतो वाज्ञाततायाश्च कुतः सिद्धिरितीर्यतां। अ
ज्ञातत्वस्य माव्याप्तेः पूर्वमेवहि प्रसिद्धितः। ततश्च मानतः सिद्धेर्नाज्ञातत्वस्य कुत्रचित्। मानव्याप्तिदे
मयैस्याद् ज्ञातत्वं घटादिवत्। वास्तवं स्यात्तदारूपमज्ञातं चस्सदा न वेत्। तथा संशयमिथ्यात्वबुद्ध्यो
रेष यथोदितः। न्यायावाच्यस्ततः सर्वो व्यवहारो न सिद्ध्यति। अज्ञातस्याविशेषेऽपि मानानां यदि मानं
ता। ज्ञातताज्ञाततोऽन्यत्वात्तत्र स्यात्किं न मानता। एकार्थोपनिपातित्वात्सापेक्षत्वं यदीष्यते। तथा
च सर्वमानानां सापेक्षत्वं प्रसज्यते। एकस्यामपि सत्तायां सर्वज्ञानां प्रमाणता। द्वितीयचक्षुरक्षणा
स्ताद्वत्र सज्येत प्रमाणता। नियोगे लौकिके वापि हरीतक्यादि लक्षणे। मानांतरासंगत्वेन प्रसज्य
तानपेक्षता। नैष दोषो नरज्ञानपूर्विका विनियोगधीः। येन लौकिकस्य तोपेक्षा वेदे तु स्याद्विपर्ययः।

10

नैवं सत्यनपेक्षत्वं वचसः कार्यसंश्रयात्। पुंबुद्धिपूर्वकत्वे न यतः सापेक्षतोच्यते। नैवं नियोग
निष्ठत्वाद्वेदे तेनानपेक्षता। सापेक्षत्वं च लोकेस्यादिति योगप्रधानतः। नैवं शब्दार्थयोरैकांत्य
दास्यादेर्लोकयोः। तदानशक्यतेवक्तुं चेल्लक्षणं तयोरिति। स्वरूपलाभः सिद्धश्चेत्स्वतो वाय
दिवान्यतः॥१००॥ स्वरूपेणुपयोगित्वान्न प्रमाणव्यपेक्षणं। अनित्यकार्थसिद्धार्थं स्वतो वाय
दिवान्यतः। अनित्यकस्य ह्ययोपि निःफलं मांतरेक्षणं। तस्मान्न सिद्ध इत्येवं सांज्ञाव्येत प्रमां
तरं। न रोको मांतरापेक्षा तेन मांतरसंभवः। क्रियां विना न संसर्गः पदार्थानामथोच्यते। क्रि
येवापेक्ष्यतां तर्हि किं न सिद्धं विधिं विना। क्रियायापेक्षयापेक्षमाणापि न यां कांचिदपेक्ष्यते।
योग्यत्वहेतुतस्तर्हि सास्थेवास्यादिकाम्क्रतौ। अकर्मकेस्यादेन तावत्कर्म विद्यते। अन्न तत्तन्वं
वार्थौ नित्यत्वादासनश्चनः। असंसृष्टात्मबोधित्वान्नापि संसर्गधीरतः। सआमेत्यत्रि संबंधान्ना
पि सत्तासतोच्यते। शब्दाद्यगोचरार्थो तो लक्षणा पात्रयाश्रुतोस्सदित्यादिपदे राशासालानः
प्रतिपाद्यते। यदापि मानयोग्यत्वं सत्वं तत्प्रतीयते। तदपि वेस्क्रू परतो नागमस्य विहन्यते॥
मांतरेणापि संबद्धमर्थं वाक्यं प्रबोधयत्। मानतां न हापयेव ज्ञगत्याहवचोयथा। ज्ञातः सोर्थोभि
येस्य च नाप्तवाक्यं विहन्यते। मानांतरव्यपेक्षत्वाविहन्येतार्थनिश्चितौ। प्रायोगेपि न मानत्वमना
प्तवचसः क्वचित्। तेनाप्तवाक्यं प्रायोगेमानादर्थे पि निष्ठितं। एवं च सति वेदांतायदि मानमलो.

किंच। प्रबोधयंति विध्वस्तानिखिलद्वैतगोचरं। कथं तेषामप्रमाणत्वं तदास्याद्याप्तवाक्यवत्॥
अर्थसिद्धिश्च मासिद्धौ सिद्धौ वेत्ति न साध्यते। किंच सिद्धत्वसंबंधादेकान्त्ये मांतरानुमा। यथै
वं कार्यताया योग्यनियोगोप्यनुमानतः किं। नियोगस्यापि कार्यत्वं प्रेषणाध्येषणादिभिः। समंतद्ध
र्मनैवास्य संबंधग्रहणं यतः। परायत्तास्मब्धानत्वं नियोगस्येष्टकार्यता। कार्येष्वंतरगम्येषु सा
न कथंचिद्विशिष्यते। यत्तु साधारणं तस्य कार्यत्वमिति जन्यते। लोके केष्वपि कार्येषु तन्नैव वि
निवार्यते। अथासाधारण ज्ञानपरिच्छेद्यत्वमिष्यते तच्च सर्वपदार्थानां नदैडैर्विनिवार्यते। प्र
माणायत्तात्मता वस्तुप्रमेयावत्तासनं। कार्यताकार्यताप्यत्र मेयायत्तानमानतः। सिद्धत्वहेतुको
योपि दोषएकात्म्यमुच्यते। नियोगस्यापि संसिद्धौ सदोषो नापनुद्यते। यागादिविषये सिद्धो न
चासौ न प्रसिध्यति। विध्यकेस्तादसंसिद्धौ निःफलत्वं प्रसज्यते। एकात्म्य वस्तुयाथात्म्यप्रकारा
न परीयसः। वंच्य संस्तुति रेकेण किमानेन ततः परं वदेत्। मात्रादिसव्यपेक्षांसच ज्ञानं प्रजाय
तोतात्रैव मांतरापेक्षा न तु विध्वस्तानेदके। विध्यर्थाधीनसंसर्गाः पदार्था वैदिकोक्तिषु। लौके
मांतरसंसिद्धसंसर्गा रचनाबलात्। रचनाबे पदार्थानां विवक्षाहृविकैयतु। प्रमाणांतरगम्ये
र्थे विवक्षाचव्यवस्थिता। एवं च सति वेदोक्तेः कार्यप्रत्ययोभ्रमः। तत्वात विधिको लोकेतो यबु
द्धिरिवोषरे। इत्यक्ते परिहारायमुच्यते पुनः। पदार्थसंगतेः कस्माद्विध्यधीनत्वमादृतं।

बार

पदार्थांतरं तत्रत्यं कस्माद्धेतोर्न कल्प्यते। संसर्गश्चेत् पदार्थानां विनापि विधिना भवेत्। अनर्थकोऽ
विदेवं विधिर्निर्विषयस्ततः। न तु दोषः समानोयं विधेरन्यपदेष्वपि। विशिष्टार्थावगमसमर्थं प्रकल्प्यं तेष
राण्यपि। एवं सति विधिः कस्मान्नानर्थक इतीर्यतां। योगक्षेमसमानत्वाद् विध्यर्थपदांतरैः। उच्यते वि
धिशब्दोयं मानतरास्तातगोचरः। न तस्य विषया होपि मुक्कान्यत्र कृतार्थता। मानांतरप्रसिद्धार्थवादि
त्वादनुवादकं। विधेरन्यपदं यस्मान्नापेक्षोतः प्रतीयते। अव्युत्पन्नोपि संबंधे विव्युत्थीकमस्ता
था। अथ विज्ञातसंबंधं सिद्धार्थस्याभिधायकं। स्वधर्मं च पदं तत्र स्यात् संबंधज्ञाननिहुतौ। तस्मादिष्टा

तसंबंधं पदं सर्वं च बोधकं। इतोन्यथा कल्प्यमाने सर्वं स्यादसमंजसं। वाक्यकार्यार्थयोगश्चेत् कार्य
वाचकत्वकारणः। तद्विशेषेकतिष्ठत्वान्नवः संबंधधीर्भवेत्। न विशेषांतरे दृष्टिर्विशेषस्यास्तिगोचव
त्। नैराकांक्ष्येण तत्सिद्धेः संबंधो नावगम्यते। संबंधं मन्यते योपि शब्दबोधानुसारिणीं। दृष्टे लोके
टग्गं सोपि न सम्यगिति मन्यते। श्रोतृस्वकार्यलिंगत्वात् कथं शब्दैकगोचरः। तस्यापि शब्दादेवैता
दिति चेल्लिंगमवर्ततः। कस्मान्न शब्दबोधोपि लब्धमानपुरःसरः। नियोगं शब्दतो बुध्वा योपि श्रो
तानुवर्त्तते। तस्याप्यनुमितेरेव शब्दार्थप्रत्ययो भवेत्। प्रत्यक्षगम्यकार्येण नियोगस्यानुमेयतः।
प्रत्यक्षकार्यवत्तस्य लिंगो किं कथं प्रसज्यते। न चेत् कार्यं नियोगः स्यात् कोर्थो यागादिसिद्धितः। सिद्धवस्तु
वबोधित्वं विधेरपि तदा भवेत्। आधर्म्यं चाचतुर्लक्ष्यं बीजतत्कार्ययोरिव। शब्दानुमानेन शब्दबुद्धे

नवेत्तिसः। भिन्ने भिन्नेपि मेये धीर्नानुवादोन्यबोद्धरि। प्रवृत्ति हेतुमात्रं च प्रवृत्त्या चानुमीयते। लौ
किके नापि तत्सिद्धिर्नास्ति मानमलौकिके। कार्यबुद्धेवसंव्याप्तिः प्रवृत्तेर्न च गम्यते। सर्पादिवस्तुबोधे
पि प्रवृत्तिर्विद्यते यतः। प्रवृत्तेः फलं कार्यं विध्यर्थश्चापि कारणं। प्रवृत्ति हेतुर्न फलं जनयते वा विधी
यते। अपसर्पस्य सर्पादेर्नैव कार्यं फलं मतं। अनर्थाभावमात्रत्वात् न याभावः फलं क्वचित्। नियो
गप्यमारूपो विधिशब्द प्रकाशितः। मानांतरानपेक्षः संन्ना क्षेपकेतया प्रमा। आक्षेपत्वं न शब्दो
त्थं न च मानांतराच्च सा। अव्यक्तपन्न प्रवृत्तिभ्ये फले दोष प्रसंगता। स्वाव्यक्तपतन यस्ये वंत्यागः प्रा
प्तोस्य नीप्सितः। प्रामाण्यं चास्य यत्रे छंश्रूते स्तत्रास्तने न किं। कथं च प्रमस्य मानत्वं न यागादौ स्वशब्दमे
व्वौ किंकोप्यि न संसर्गो विध्याय तोः स्थितोयतः। विध्याभावे हि संसर्गश्चो तु रस्य विधावपि। फलसाधन
ता किंश्चेद्धि धायत्वाज्जविष्यति। नेवं तत्रापि शब्दस्य सामर्थ्यं केन वार्यते। तस्मादितरतुल्यत्वान्न विध्य
र्थ निबंधनः। संसर्गः स्यात्पदार्थानां तु स्वच्छमेवं विधिं विना। तस्मात्सर्वपदार्थानामाकांक्षा योग्यसं
न्निधेः। परस्पराभिसंबंधा दिशिष्टार्थाय बोधिता॥ ननूत्पत्ति विधिर्यद्वत्कर्म बोधे व्यवस्थितः। आ
त्मज्ञान विधिस्तद्वदात्म बोधे पि तिष्ठतां। कर्माधिकारवद्यात्रे प्रवृत्तिरपि सेत्स्यति। अप्रवृत्त प्रवृत्तिं च
तथा स्वसुहार्थबोधनां। एवं विधिभिरेहंति विध्ययोग्येपि वस्तुनि। विधिराग वशात्केचित्तान्यतीदृश
योच्यते। कर्मस्वरूपबोधे हि व्यापारो नेष्यते विधेः। किंतूत्पन्नस्य सापेक्षया दधिकारेण संगतिः। अधि
कारश्चैव शेषं नात्मज्ञानस्य युज्यते। यस्याधिकारसंबंधः स आत्मा न विधीयते।

२९

धीत्वादि विषयं यद्यत् फले नापि निरूपितं। प्रसंख्यानाधिकारानुप्रवेशं प्रतिपद्यते। अन्योऽप्यनुजवो
पायो मननध्यानलक्षणः। सोपायो विहितास्त्येव प्रतिपत्तिविधिर्विना। दर्शनस्याविधेयत्वात्तत्संबं
धोपलक्षितः। प्रसंख्यानात्मको ऽपि प्रयत्नोऽनुभवं प्रति। शमाद्यंगान्वितः सर्वमात्मेति स्मृतिलक्षणः।
मननाद्यर्थवत्त्वाय फलरूपेदिति विधीयते। फलरूपेदिति प्रयत्नस्य फलं स्याद्दर्शनं तदा। लक्षणं नेध
फलस्य लक्षणं चेत्कथं फलं। लोके दर्शनसंबंधं प्रसंख्यानं समीक्षितं। वेदेऽपि किं तथा तत्स्यान्नवात
त्ताद्विधीयते। सामान्येनोषधं मध्वङ्ज्वरनाशोपलक्षितं। दृष्टं कष्टज्वरेप्येवं विशेषेणोपदिश्यते।
अप्यज्ञातफलं साक्षान्मातरे विधिसंश्रयात्। अज्ञायनिश्रयाज्ञाबात्प्रसंख्यानं फलापनः। पथ्या

॥२९॥

दावेवमेवस्यात्संदिग्धप्तिविनिश्चयः। खपुष्पेत्वनुपायत्वान्निश्चयोऽस्ति विपर्ययो। एवं केचिद्यव
स्थाप्य प्रसंख्यानविधिं पुनः। ऐकात्म्यज्ञानतात्पर्यं तस्यापीच्छंति युक्तिभिः। विधित्स्वातंत्र्य पक्षोहि कि
ल्वैकात्म्यं न सिध्यति। तच्छास्त्रं विधिनिष्ठत्वात् न स्वरूपेऽर्थवादतः। अपि शास्त्रासमुपन्नेऽस्मिन्न्या
शोच्यानपहारतः। तत्साक्षात्करणायैव प्रसंख्यानं विधीयते। मानेन विषयः सिद्धो तादृग्दक्षावि
योग्यतः। प्रसंख्यानविधिर्नस्यात्स ह्यपि मननादिभिः। अकृतेर्ज्ञातास्ततोऽननुवृत्तमपि स्वकं
स्थानकं वांछतः शास्त्रात्प्रसंख्यानं विधीयते। स्वव्यापारमुखेनैव शास्त्रं स्वार्थावबोधकृत्। ननु
व्यापारविरहान्मातो ह्यकरतामकृतेः। स्वव्यापारतिरोधानं करणानां न चयस्थितं। तस्मादैकात्म्यता
त्पर्ये प्रसंख्यानादिमुस्थितं। बोधयित्वापि चैकात्म्यं नोतरां पर्यवस्यति। आपुमर्थविधेः शास्त्रप्रामा
ण्यं न लभ्यास्फुटं। परोक्षदर्शनालोकेहि वदत्स्वार्थं स्वकं जावतः। संजावयत्प्रमाणत्वं फलं स्वीकृतवर्त्तते।

॥२९॥

याथात्म्यावगमेऽत्रात्मोद्गमोऽग्नाविव सर्पिषि। स्वीकृतस्यैव प्रसंख्यानं फलक्लृप्तिर्वस्तु निवर्तते। इत्यादि वर्त्मना
शास्त्रं साक्षाद्वस्तु प्रसाधयेत्। विधिं प्रति प्रधानत्वं स्वीकृत्यान्येति मानता। संसर्गकल्पनामन्यमपि
कार्त्स्न्यं प्रबोधयेत्। अनयैव दिशा शास्त्रं संसृष्टार्थाभिधाय्यपि। यतो वाचो निवर्त्तन्ते इति श्रुत्यैव दर्शिता।
व्यपास्ताशेषसंसर्गकल्पनं ब्रह्म निर्णयी। शास्त्रेणानभिधानेऽनुनियोगेऽपि न कल्प्यते। एवं शेषविषयत्वे
न तुल्यं चोद्यमतो द्वयोः। विधिं विनाश्रुते कार्यस्य स्यादार्थान्तु जल्पते। उपायाङ्गतया कुर्यात्तच्छास्त्रस्यार्थ
वादता। विधिनिष्ठेऽपि शास्त्रस्याद सिद्धवस्तुनो मितेः। देवताध्यानवत्कल्प्यं फलमेकार्थ्यवेदने। प्रति
पन्नात्मयाथात्म्यः प्रसंख्यानादिनेहते। अज्ञस्तस्याविर्तोप्य स्याद्विनानाप्नोति तत्फलं। शास्त्रसिद्धेऽवस्तु
निष्ठेऽपि प्रसंख्यानं विधिं विना। पुंप्रयोज्यं च्यते नैवेत्य सावपि समाश्रितः। नान्वयव्यतिरेकाभ्यामेकार्थ्या
नुमेन वोन्नवेत्। तत्सिद्धावेव तौ स्यातां सवतान्त्यापितिश्चयः। यथैव विश्वजिद्यागपदस्वार्थानुपालने। कुर्व
तीस्वर्गकामेन गच्छंतः सह मानता। तथैव शास्त्रतत्फलौ स्वाभिधेयार्थपालनं। कुर्वंस्योमानतो यातः प्रसं
ख्यानेन नान्यथा। एवमैकार्थ्यतात्पर्यं शास्त्रस्येष्टेऽपि युक्तिभिः। केचित्कार्यमपीच्छंति तदर्थं तन्न युज्यते।
प्रमात्रादित्रयं यस्मात्संविन्मात्रवपुर्नतः। सिद्धायतेऽप्रसिद्धं सत्त त्सिद्धे किमपेक्ष्यते। परोक्षेऽप्यपिय
दस्तु यत्साक्षीत्यात्मरूपतः। साक्षादात्मेवया भातितस्मिन्पारोक्ष्यधीः कथं। अप्यज्ञानादिभिः शेष
मे प्रैयव्यवधानकृत्। स्वतः प्रसिद्धात्संसिद्धे तदसिद्धिः कुतो भवेत्। स्वमहिम्नैव यः सिद्धः सर्वप्रत्यक्ष
मध्ययः॥८०॥ तत्तमोहतितः कार्यं किमन्यत्तत्प्रमाणजं। मात्रादित्रयहानेऽपि हानसोद्धितयेष्यते।
येनासावविद्धुष्टाद्वास्तत्पारोक्ष्यं कथं भवेत्। भावनावर्त्मनैकार्थ्यविध्यर्थासंभवो यथा। अधिकार

नू

(२२)

परीक्षायां तथा प्राक् प्रतिपादितं। नियोगपक्षमात्रस्य विध्यर्थसंभवो यथा। ऐकात्म्यसिद्धौ यत्नेन
तथा च प्रतिपाद्यते। ऐकात्म्यस्य स्वतो मुक्तेः रज्ञानात्तस्य बद्धता। साध्यत्वे साधनापेक्षा सिद्धे तन्न
व्यपेक्षते। तमोमात्रान्तरायत्वादैकात्म्याख्यस्य वस्तुनः। असाध्यसाधने तस्मिन्कापेक्षा भाव
नां प्रति। यदा नु भवकामस्य कार्यं साध्यं प्रतीयते। प्रसंख्यानं तदैकात्म्यतात्पर्यं कथमुच्यते। कार्यत्वा
न्यपरं चेति द्वयमेतद्विरुध्यते। साध्यं हि सर्वदा कार्यमन्यत्तस्य प्रसिद्धये। विशेषणं नियोज्यस्य भवन्नकुल
वः फलं। विषयः सन्प्रसंख्यानमनुतिष्ठते नैर साधनं। भावार्थविषयं कार्यं प्रसंख्यानं कथं भवेत्। आवृत्ति
र्हि प्रसंख्यानं शब्दयुक्त्योरिति स्थितं। अथ श्रवणभावार्थविषयं कार्यमिष्यते। तदा श्रवणमेवस्या
।।२२।। द्विशिष्टो विषयस्तवे। दर्शपूर्णमासादावाद्रियते यत्रापि फलमुच्यते। सगुणात्सोपि मासादेः फलं तत्रापि ।।२२।।
नो गुणात्। गुणाय त्रापि दध्यादिः कार्यविच्छेदको मतः। भावार्थवेशात्तः सोपि प्राप्तेवास्मिन्न तु स्वतः।
श्रवणादेर्न च प्राप्तिर्गुणान्न च फलं श्रुतं। पत्रयेदिति लिंगात्वर्थः केवलो विषयः श्रुतः। नापि तद्बुद्धि
वृत्तिर्विधेया श्रुतहानतः। कार्यं यन्नापि भावार्थात्तदा वृत्तिर्गुणात्कथं। स्वयं प्रबोधितेप्यर्थे यदि फ
त्क्याद्यपेक्षते। शास्त्रं सापेक्षमेवं स्यात्स्वतः प्रामाण्यवर्जनात्। फलत्वादिमांतरं नाचेभानीशाचेन
तत्स्थितेः। संभूय पादाः सर्वेपि चैकात्म्यं बोधयन्ति नः। न संभूय यतः पादा तैर्लवत्वंगतयो यथा। मितेः
स्वरूपलाभाय न तु मेयोपलब्धये। संभूय यदि सर्वाणि फलमेकं प्रतन्वते। प्रत्येकं प्रमिते दृष्टे द्वितीये
तत्स्या तदा मृषा। संभूय फलकारित्वं क्रियाकारकसंगतेः। स्वरूपलाभतो नान्यदभिव्यक्तावपेक्षते।

तेऽव सर्गन्नयोयस्मात्सदीपोत्पत्तिकारणं। अव्यासवत्तो दीपोर्थं स्वयमेव प्रकाशयेत्। शब्देन ज्ञाप्यते
यद्वत्तथैव यदि फलश्रुतिः। व्यर्थता च विशेषस्य संप्राप्ता भिन्नमानता। स्वर्गादिफलश्रुतिश्चेत्तद्धेतौ किंकी
र्त्तिः प्रसाध्यते। अवैदिके त्ववेदस्य स्याच्च स्यात्त्वनुवादता। वैदिकत्वेऽपि युक्तीनां आगमार्थप्रबोधतः। अ
नुवादत्वमेव स्यात्स्याच्च शास्त्रादिभिन्नता। आवृत्तिश्च प्रसंख्यानं कुर्यात्सातिशायं कथं। न ह्यावृत्तो प्रमाणस्य
प्रमेयेऽतिशयो यतः। यत्रापि विप्लवकारादि दोषाक्रमविनिश्चयः। तत्रापि भिन्नमेयत्वान्नैव संततयमा
नता। एवं च स्थितिविज्ञानं प्रामाण्यं मानुषस्तथा। पुरुषायमथत्रयामोऽडिच्छेद्यसर्थे भिन्नता। परिच्छे
दफलत्वं हि मानत्वं तच्च भिद्यते। तद्भावे हि पूर्वेषामुत्तरस्यैव मानता। अथ मेयप्रभेदेऽपि प्रमाणे
कत्वमिष्यते। वस्तुक्व याहि तयोऽस्मादेकार्थ्येऽभिन्नतामता। साध्यमानं प्रसंख्यानं यागवत्साधयत्फ
लं। कारकं ज्ञापकं शास्त्रं तयोः स्यादेकता कथं। प्रमातात्मान मानांशगोयच्च यं व्यावहारिकः। परस्वे
स प्रमेयः स्यात्कथं वानुत्तवः फलं। स्वरूपं यच्च साध्यं तत्स्वांतं त्र्येण प्रसिद्धितः। तच्चांने वेत्त्यमाप
वैतच्च शास्त्रान्नकार्यतः। शास्त्रमावर्त्य मानं हि स्वतावैनैव मुच्यति। परोक्षवृत्ति फलश्चकथं तोमि
तिवर्द्धने। प्रमितस्य प्रमेयस्य दृष्टौ वृद्धिः स्वतो नहि। तस्य वृद्धिर्मिते दृष्टा विस्यन्योन्यसमाश्रयः। त
त्पाद्योपि मितिं शास्त्रं यदि फलत्याद्यपेक्ष्यते। स्वर्गादादेव मेवस्यात्सापेक्षं च जवे तदा। व्यपास्तानर्थसंदर्शमा
त्मोन प्रवगच्छतः। किमाप्यमपि किं शास्त्राच्चेन फलत्याद्यपेक्ष्यते। कावा फलश्रुतिः प्रदीपस्य सर्पाद्याकंपनाशनं। र
ज्वादितत्त्वविज्ञानं कुर्वतः स्वेन तेजसा। गुणप्रधानभावेऽपि विनानैवैकवाक्यता। वस्तुकार्यार्थता सर्यत्नेदान्ना
पीह साज्ञेवेत्। न च प्रयोजनैकत्वलक्षणाऽत्रैकवाक्यता। अंगप्रधानवधेन कल्प्यता त्रैकवाक्यता। स्वतःसि

४३

सु॰वा

त्रिका॰

द्वस्यपोद्वस्य न साध्यमुपकारकं। न चान्यथाङ्गताद्दृष्टप्रधानानुपकारिणः। आप्तभ्रान्तेन शास्त्रं यन्निय
त्यकार्यमीद्दते। स्वतोऽभिधानशक्त्या। नापि चैकस्य बोधने। प्रसंख्यानेन शास्त्रार्थे सकृदेव कृते भवेत्।
एकोऽस्यानुभवो नो चेद्विसंवादादमानता। न चात्रयोदितः कालः संख्या वा येन निश्चयः। तद्वारेण भवेन्नापि सं
दिग्धस्याप्रवर्त्तनं। आरूढस्याप्यथ वा दूरं विसंवादपराङ्मुखः। यत्किंचित्कामतः कुर्यादकृतार्थोऽथ वा प्रवृतेः।
अदृष्टफलता वापि कल्प्याग्निहोमवद्भवेत्। कर्माङ्गतावा कल्प्यास्यादुक्तोऽथ विधिवत्तदा। ततश्च प्रति भ्रमो नो
कार्यस्याच्छास्त्रबाधनात्। अत्र ह्याशुमुद्गूर्णं कार्यं बाधोऽपि च स्थितः। वस्तुतत्त्वानपेक्षत्वात्कार्यमात्रप्रधानता।
शास्त्राद्यवस्तुनोऽवगतात्कार्यं किं विषयं भवेत्। यदि तद्वस्तु याथात्म्यं शास्त्रं न प्रतिपादयेत्। वस्तु सिद्धेस्ततः

॥२३॥

कार्यप्राधान्यादर्थवादता। अथैकोऽस्यार्थनिष्ठं सच्छास्त्रस्यास्ति प्रतिपादकं। आपरोक्ष्यात्तदा कार्यं व्यर्थं पारोक्ष्य
तो निकृत्। शास्त्रात्कथं तत्सिद्धिर्यथास्या नवबोधकात्। नानश्चरूपे सिद्धेऽपि गव्यश्चस्य प्रसिद्धता। शास्त्रश्र
वणमात्रेण कार्यं प्राप्नुभवो यदि। वस्तुन्यनिश्चिते वा तत्सार्थवादेऽपि दृश्यते। ततश्च कार्यनिष्ठत्वं गुणैव परि
वर्जितं। संपत्परं भवेच्छास्त्रं वस्तुतात्पर्यवर्जनात्। न चाप्याख्यायिकारूपमनुगास्यं कृतो मतं। आदिमत्वादि
दुष्टत्वात्पुमर्थत्वेन वर्ण्यते। पौनरुक्त्यभयाच्चात्र पद्यर्थान्तरकल्पनं। ऐकात्म्यो क्वापि विधिर्व्यर्थ इति द्वैतकल्
पनं। नयमानेन विषये बाधितं चेषणं पुनः। कार्यकृत्योः क्वचिद्दृष्टं स्वतःप्रामाण्यबाधनात्। प्रत्यक्षेण
च ये बुद्धेः कार्यक्तिः कार्यमेव वा। अदुष्टकारणत्वेऽसिद्धं वेदे न्व वर्जनात्। प्रत्यक्षादिविरोधश्च कार्यपक्षे
पि सुस्थितः। एकास्यानुभवोपि स्यात्कथमक्षादिबाधनात्। तन्निषेधानुपासिद्धिर्न सा कार्यप्रसादतः।
प्रमाणादेव शास्त्रात्सा न मेया कार्यतो भवेत्। का वा कार्येऽस्ति तत्शक्तिः शास्त्रं चेदुभयोः समं। अज्ञा

॥२३॥

तज्ज्ञापनादन्यच्छास्त्रान्तरेति पुरोदितं । पुमर्थं प्रतिपाद्यापि प्रकृत्यैव श्रुतिः पुनः । तमेव यज्ञक्तिजिज्ञासार्थं वदं
ती स्वार्थमीह्यते । नैतावता पराधीनकर्तृयोगानकारणं । शब्दमात्रादसंसिद्धेरनपेक्षत्वहानतः । नवा
योः क्षिप्रकारित्वाद्धेताल्पं ज्ञो विजृंभते । विध्युद्देशात्तु तत्सिद्धेः दोषं तु तं प्रवृत्तये । जाग्रत्स्वप्नसुषुप्तेभ्यो
यदि नाम्नातिरेकतः । व्यक्तिर्व्योमगोचर वद्दृष्टं ब्रह्मत्वेऽस्य किमागतं । असिद्धं शास्त्रफलं व्याप्तावृत्त्यापि न सि
ध्यति । नैव स्वाभावर्त्तनं हेतुः प्रामाण्ये न्येषु नीक्षणात् । न वेदत्वं प्रमाणत्वं दृष्टमन्यत्र कुत्रचित् । अन्यादृक्त
प्रमाणस्य न चनास्य तत्र संभवः ॥ अलौकिकार्थवादित्वादात्मब्रह्मात्तिज्ञानयोः । संबंधाग्रहणात्साम्ब्रत्त्येति
कथमुच्यते । ज्ञाताथे संगतिः शब्दो वाक्यार्थावगमक्षमः । शब्दोऽसार्थ प्रसिद्धो व लोकान्मान प्रवेशितो । नात्मन्ये
वात्रास्य प्रयोगस्यादलौकिकः । ब्रह्मार्थोऽपि महत्वेन प्रसिद्धो व्यवहारितः । एवं पदात्परिज्ञाते पदार्थे लौ
कमानतः । वाक्यार्थो तीडीयो वेदवाक्यात्केन निवार्य्यते । अपूर्वदेवतास्वर्गपदार्थेष्वपि लोकतः । सिद्धेष्व
तीडीयोप्यर्थो वाक्यादेवावगम्यते । नापेक्षा पूरणाच्छक्तेः प्रयोगे समवायिता । पदानां सपदार्थानां वाक्या
द्यवहितार्यतः । वाक्यार्थायैव वाक्यं हि सर्वदेव प्रयुज्यते । व्यवहारेषु वृद्धानां संबंधस्तात्र गम्यते । जागं
तरप्रवेशेन जागत्यागेन चस्फुटं । वाक्यवाक्यार्थयोर्जैदे पदार्थानां निमित्तता । यज्ञागस्यागमो योर्थ
जागस्यादधिकः क्वचित् । तस्य जागस्य जागो सौ निमित्तं स्यान्न तु प्रमा । अत एवं जागत्वं वाक्यवाक्यार्थस
र्थयोर्मतं । वाच्यकत्वेपि वाक्यस्य संसृष्टार्थाभिधानतः । ततश्चैवं संसृष्टस्य वाच्यकत्वमवस्थितं । जागवत्सं
च संसिद्धं वाक्यवाक्यार्थयोर्यतः । एवं च लोकतः सिद्धो वाक्यार्थस्याप्यतावपि । लौकिकाएव शब्दार्थान्यायैनो
क्ताः श्रूतीयतः । नृविवक्षाव्यवायेन लोके शंकात्तवेदपि । वेदत्वपौरुषेयत्वात्सा प्रार्थे प्रमाणता । न चकार्य त्व
परत्वेपि पदानां संहतिः स्थिता । अन्यत्रावगमान स्यात्संबंधज्ञानवर्जनात् । यथाय कार्यता सर्यंक ।

24

यंचापि नविद्यते। सर्वमेव तथास्मात्तिर्यक्तिन्त्रिः संप्रसाधितं। अनादिदृष्टव्यवहारस्यैव यत
स्थितेः। शब्दस्यार्थेन संबंध आदिमत्तानशंक्यते। प्रथमश्रवणे यत्र न शब्दार्थावधारणं। तत्राव्यु
त्पन्नता हेतुः शब्दानां न त्वशक्तता। चक्षुर्दृष्टमपि बाह्यं हि न प्रकाशं विनार्थदृक्। नैतावतास्य सामर्
र्थ्यं हन्यते न्यस्य वा जनवेत्। व्युत्पत्त्या न च संबंधः क्रियते र्थशब्दयोः। अवस्थिते हि संबंधे दृष्टे ज्ञो
प्रज्ञायते। संबंधकरणाशक्तेस्तत्कर्तुर्ह्यप्यस्मृतेरपि। तद्विनाव्यवहाराश्च सिद्धा संबंधनित्यता। जीर्ण
कूपादिवत्कर्तुर्यद्यप्यस्मरणं न तत्। अज्ञावगमकं नापि संबंधे नास्य तु बुध्यता। क्वचित्स्रुतेषु दूरा
दिकारणे संशयोत्थितेः। नात्यंतानुपलब्धेषु पुंव्यज्ञावोतोस्य निश्चितः। संनिकृष्टार्थसंसृष्टस्वार्थमात्राभि ॥२५॥
॥२५॥ धानतः। तस्मात्सिद्धो त्र वाक्यार्थो लोके वैदे प्रमाणवान्। अतो वबोधकत्वेन दुष्टकारणवर्जनात्। अबा
धाच्च प्रमाणत्वं वक्तृन्यत्वादिवक्तृतः। पुरुषार्थोपदेष्टृत्वात् यदकार्ये प्रमाणता। तथैकात्म्ये विशेषाद्वा पुंम
र्थ इति गायचेतः। पुंमानिष्टस्य संप्राप्तिमनिष्टस्य च वर्जनं। इच्छन्नपेक्षते योग्यमुपायमपि तत्परः। ग्रामा
दिं किंचिदप्राप्तं प्राप्तुमिच्छन्निरीक्षति। हेमादि विस्मृतं किंचित्करस्थमपि लिप्स्यते। परिहार्यं तथानिष्टं कं
कादि जिहासति। रज्वां सर्पादि किंचिच्च त्यक्तमेव जिहासति। नियतोपायसाध्यत्वादथवाप्य परिहार्ययोः।
त चिकीर्षितः प्रतिषेधाश्च साधनापेक्षता जनवेत्। अज्ञानांतरितेन संप्राप्तस्त्यक्तयोः पुनः। यथास्वप्रज्ञानतो
नान्यत्पुरुषार्थाय कल्पते। अशेषानर्थविच्छेदं वांछतः श्रूयते ततः श्रुतेः। लभलेति हताशेषच्छेद्यो रागमोह
पूर्वणतः। वेदस्य सिद्धे प्रामाण्ये तज्ज्ञातार्थावबोधतः। कार्ये यथाप्रमाणत्वमेकात्म्येप्यवभिष्यता। कार्याधिद
उमानत्वमानत्वात्कार्यं निह्नुता। अन्योन्याश्रयतैवं स्यादेकस्यासिद्धितोन्यतः। औदासीन्यान्निषेधेषु नव्य

ज्येत प्रमाणता। औदासीन्यं हि वृत्तिर्हि स्वरूपावलंबनं च ततः। सोरादीदादिवाक्यानां कार्यं वेदप्रामाणता।
अपुमर्थोपि देहत्वात्तच्छुन्मात्रे सकारणे। न चैकात्म्याख्यपायस्य मिथ्यात्वमिह शंक्यते। उपेयाप्तौ कृतार्थ
त्वादुपायं प्रत्यनीक्षणात्। ऐकात्म्यप्रतिपत्तेः प्राङ् मिथ्यात्वस्य भावतः। पुरुषार्थावसायित्वान्नाप्यूर्ध्वम
नपेक्षणात्। उपेयबोधनं मुख्यं पिमिते नान्यास्ति सत्यता। सत्यादप्यनुपायत्वात् घटान्तानिहि गम्यते॥
धूमाज्ञानाच्च बाष्पादेर्यद्वह्निर्नावगम्यते। हेतुस्तत्रानुपायत्वमसत्यत्वं पुनर्न तु॥ ५०॥ धूमवत्परमार्थ
त्वमुपायस्यान्न लक्ष्यते। वेदान्तानां तथैकात्म्यप्रतिबाधः स्फुटो भवेत्। बाष्पवन्नापि मिथ्यात्वादनुपायत्व
मिष्यते। ऐकात्म्याबोधबाधेन सिद्धात् पायेसत्यता। कृते रैकात्म्यसंवित्तौ चरितार्थत्वतो मितेः। दृष्टोपो
यपरित्यागस्याउत्तीर्णस्य छत्रवत्पथः। बाह्येष्वर्थेष्वनात्मत्वात् पुनः शंका भवेदपि। अत्रोच्यानुपेयस्याकार
कामानतांप्रति। अन्यत्रैव न चाप्यत्र वाक्यार्थो भेदलक्षणः। संसर्गलक्षणो वापि ब्रह्मात्माभेदतो भवेत्॥
ब्रह्मणो नाम तारूप्यमसत्त्वं तथात्मनः। अज्ञानलक्षणं शास्त्राज्ज्ञानं हन्ति सदुत्सतत्। नेहान्यचात्मनो ब्रह्म
तथात्मा ब्रह्मणोन्यतः। तादात्म्यमनयोस्तस्मान्नीलोत्पलविलक्षणं। अब्रह्मात्मते यद्वत्राज्ञाननिबंधनं॥ ८
आत्मता ब्रह्मतेनैवमन्यस्मादित्यतः स्वतः। नाम्नोरेवं च संबंध एकात्म्यात्स्या क्रियां विना। षष्ठीवन क्रिया
षष्ठ्योर्विनाभेदात्प्रवर्त्तनं। महत्तायद्वदाकाशो घटाकाशव्यपेक्षया। परापेक्षया तद्वत्प्रत्यक्त्वात्मन
द्दृते। प्रत्यक्त्वमद्वितीयत्वं बोधवन्नान्यबंधनं। अपारार्थ्यान्निबोधो हि स्यादबोधनिरासतः। आत्मापि सद
दंब्रह्म मोहात्पारोक्ष्यदूषितं। ब्रह्मापि सद्वितीयतयेष्यते। आत्मा ब्रह्मेति पारोक्ष्यं सद्वितीयत्वबाधनात्।
पुमर्थे निहितं शास्त्रमिति सिद्धं समीहितं॥ ॥ननु भेदाश्रितैर्वाक्यैर्विधायकनिषेधकैः। अखंडादिश्च

संस्तथैवासार

नैकात्म्यं बाधितात्प्रमाणवत् । न चाप्यैकात्म्य शास्त्रस्य तेर्विकल्प्य समुच्चयो । प्रामाण्ये न पि बाध्यत्वं तेषां
तेन कथं च नाविरुद्धमानत्वे पि न हि वस्तु विकल्प्यते । भेदाभेदौ न वस्यातां विरोधाद्घटपटवदिति । कि
ञ्चाभिन्नं न वो वस्तु येन माना विरोधिता । नेह नानेति भेदानां निषेधाच्च भेदधीः । वर्णादिग्रहणो पा
यो नापीहाद्यादिबाध्यते । संस्कारायच यच्छास्त्रमात्मज्ञानोपकारकं । न पयारार्थतः शास्त्रं सावकाशं न
पथ वा । अद्वादेरश्रुतार्थत्वात् कथं स्यात्तेन बाधनं ।। ।।न्यतेऽलौकतः सिद्धं भेदमाश्रित्य चोदना ।
प्रवृत्ता पुरुषार्थाय न तु भेदाववुद्धये । भेदस्य यापुमर्थत्वात्तादर्थ्ये स्यादमानता । पुमर्थत्वेन चास्येष्टं प्रामाण्यं
वेदवादिभिः । वस्तु स्वरूपं स्पर्शरुचि करादिर्यन्नच्छिती भेदस्पृङ्नाचज्ञाद्येवं न तेनैकात्म्यबाधनं । प्रमेयवि
षयमानं वस्तु न स्यु प्रमेयतां न च भेदस्य वस्तुत्वं वस्तुताचानपेक्षणात् । लब्धे हि भेदतत्वे लब्धो घटस्तत्र
निषिध्यते । भाजांतरेण विज्ञातो नाज्ञातः शून्यताप्तितः । व्यंजकस्य समायोगो वस्तुनो वस्तुनैव हि । नाभा
वेन निरात्मत्वाद्घाद्यत्या बाधितेत्र्येवेत् । नातो वस्तुनि संदो च वस्तुनोऽभेदरूपतः । न प्रमाणाद्बहिर्वस्तु सा न
न वस्तुनो बहिः । नाभावयोर्विभयोगोऽवस्तुत्वाद्भेदत त्वयोः । अभावभावयोस्तद्भावरूपेषु कालिदा । अ
नित्यत्वस्य धर्मस्य घटादेर्धर्मिणस्तयोः । संयोगः समवायो वा तादात्म्यं वेह संगतिः । आधाराधेययोगे
पु चदायेति यथामतिः । नाभाव भावयोगेषु मिते धीः कस्यचित्तथा । न हि भावातिरेकेणाभावाभावः प्रमा
णैर्मितः । भावात्मनाप्यतो भावो व्यवहाराय कल्प्यते । अथाभावोऽपि वस्त्वेव नास्तीति मितिजन्मतः । द्वया
त्मिके करतपचोक्तानि नीतिमितेस्तयोः । विध्वंसदेव यस्येष्टं तस्याभावः कुतो मितेः । न च भावातिरेकेण
भाववत्सिद्धिमश्नुते । अभावयोगं भावस्य सतु तेनील्ययोगवत् । अविरोधो दभावेनं भावापह्नुतिर्भवेत् । न
यायोगं वस्तुनो दृष्टः प्रथ किंद्धो परस्परं । मेषयोर्मद्घयोर्यद्वन्न भावाभावयोस्तथा । न यो ओऽभावयोर्द्वै

ष्टोतं ध्यापुत्र खपुष्पयोः। [illegible]वाऽभावयोरेव विरोधादितरेतरं। क्षितिदेशे घटाभावो घटवन्न प्रमीयते।
येनैवासमवायाद्वा नाभावक्षितिदेशयोः। सदात्मतैव सर्वस्य नाभावात्मकता सतः। अप्यभावात्मकत्वेपि
सतोऽभावात्मकत्वतः। कुतोऽस्ते दावकाशः स्यात्केदेऽसतिकुतो युतिः। यावत्किंचिदभाग स्यास्मिन्नूने दर्कवस्तु
च्यते। अनापन्नादिमध्यांतं सदेव तदितीष्यते। सदेवेदमिति स्पष्टं तन्मूला इतियापरं। प्रकृत्योदाहारिनः
साक्षात्सदैकात्म्यावबुद्धये। मानाभावस्य मानत्वं मेयाभावस्य मेयता। न्यायं न सहते तीव यथा तदधुनो
च्यते। बोधकं यदभुक्तस्य तन्मानमिति हि स्थितिः। न च प्रमाणनास्तीव मीदृक्तस्मान्न युज्यते। मेयाभावः प्र
माणानां यथाऽभावेन गम्यते। प्रमाणानाम[illegible]भावस्य गमकः कोभविष्यति। नाक्षादि पंचकं तस्य बोधकं सत्स
मन्वयात्। न यत्र स्तोदभावो वा मेयत्वे नैव तास्थितेः। नीलादिवदभावस्य यद्यक्षादि विशेषणं। विशेषणे
न तद्ग्राह्ये स्यादभावः कुतोमितेः। अथ विशेषणोऽभावो न वक्तिरभिधीयते। मेयाभावस्य मानत्वं मविशेषा
असज्यते। घटाद्यभाव इत्यक्तिर्न सम्यगिति मे मतिः। पदानाम समर्थत्वाद्विरोधाद्वस्तुनोऽर्थिथः। भावाभावा
ख्यपदयोः सामर्थ्ये च समानता। घटादिनानपेक्षत्वान्न समासः प्रसिध्यति। अभावस्याभाव इत्यत्र षष्ठ्यर्थः
कतमो मतः। न कश्चिदपि संबंधो नीरूपस्या सदात्मनः। वस्त्वंतरमभावश्चेदन्यदन्य द्भवेत्कथं। अन्योपि
चेद्भवेदन्योऽविरोधान्नीलवद्भवेत्। संगतावविरोधीचेन्न संबंधिनिवृत्तिकृत्। न संबंधिग्रहोऽभावे संबंधो
ऽयं प्रसिध्यति। संबंधिविरहेऽसिद्धो षष्ठ्यर्थत्वं न सिध्यति। विरोधाद्धगपन्नापि विधान प्रतिषेधनं। कथं पिकल्या द्वि
यां नापि स्थापि धर्मः क्रमो भवेत्। अनीलाभावबुद्धेन नापि नीलस्य वेदनं। न ह्यदृश्य निषेधस्याद्घटो द
रिवभूतले। नान्याभावविशिष्टत्वं कस्माभाव गतो भवेत्। अन्याभावस्य चाभावत्वे स्यादभावः खपुष्पवत्। भो
वांतरमभावश्चेत्सिद्धं वस्तुततः स्वतः। तद्ग्राहिणीत्वमानानि व्यावृत्तिः केन गम्यते। चित्रेपि विषये चित्रप्रकंवेरन्

२६

कमानतः। प्रत्येकं नीलरूपी तापि ग्रहणे चित्रता कुतः। वस्तुनो भेदरूपत्वे वस्त्वभावः प्रसज्यते। अन्यधर्मत्व
भिन्नं स्यात्स्वतो वस्तु प्रमाश्रयं। भिन्नाभिन्ने विरुद्धत्वान्नैकमानस्य गोचरः। वस्त्वात्मनाऽविरोधश्चेद्वस्त्वेव
विषयस्ततः। सत्यं वस्तु कथं भिद्यात्तुं व्यपेक्षाविनिर्मितः। भेदः पुत्रादिभावेतु जन्यत्वं वस्तुकल्पितं। द्रा
पाकप्रकारादिभेदेऽप्यग्ने रभिन्नता। कार्यतोपि न भेदः स्याद्वस्तुभेदव्यवस्थितेः। विभिन्नकार्यकारीणां
शक्तीनां यद्वदाश्रयः। न विरुद्धाग्निरेकोपि तद्वत्कार्येपि किं न ते। घटाभाववपटस्सिद्धो सपटाभाववपटेस्तथा।
अन्योन्याभाववद्दृष्टेस्स्यादन्योन्याश्रयता तव। पृथक्त्वं पृथक्त्वस्य गुणत्वाच्चेरपीष्यते। तेषामपि गुणमानं
नीलत्ववत्तु वस्तुनि। अथ वस्तुपृथक्त्वेन विशिष्टं गम्यते तदा। स्फुटको गौरिति वस्मानं वस्त्वन्यपेवन भेदगौ। अने
२६॥ दैनैव वर्त्तेत पृथक्त्वादि वस्तुषु। वस्त्वेव तत्तत्तो न्याच्ये दपृथग्वस्तु तर्हि ते। भावाभाव पृथक्त्वापि यद्यस्तित्व ॥२६॥
ततो पृथक्। भावाभाव विभिन्नाच्चे स्पृथक्त्वान परस्परं। अन्यापेक्षं न पृथक्त्वं चेत्स्वयं तर्हि पृथग्वपुः। द्वि
धर्मत्वेप्यि वस्त्वैतदेकं स्यादुत्पलादिवत्। धर्मबुद्धिप्रभेदेपि धर्म्यभेदः सदेष्यते। अतो गवादिभेदेपि स
न्मात्रवसीयते गोत्वादिमेयपक्षेपि सद्[illegible]स्यान्नेपायतः। वस्त्वेवमेयं गोत्वादि सावलेयादिवत्स्फुटं। सद्रू
पत्वापरित्यागाद्भावांतरनिबंधनाः। व्यवहाराः प्रतीयंते सत्तात्वं तेषु व्यवस्थितेः। सत्तातोपि न भेदः स्यादुव्यत्वा
देः कुतोन्यतः। एकाकारास्तिर्हद्वित्तिः सद्द्रव्यं सद्गुणस्तथा। समवायाच्च संबंधे नैकरूप्यं विभिन्नयोः। तच्च
त्त[illegible]तो न विश्वासो जातावप्येकबुद्धितः। संसर्गधर्मता नापि भेदे नानुपपद्यं तं। समवाये न संबंधेको ना
हेतुरिति नेच्यते संयोगश्चेद्विदोगोपि समवायेऽनवस्थितेः। स्वतंत्र्येत्कल्पनो व्यर्थाद्व्यपस्यापेक्षता
स्वतः। सत्तावशं तिताश्चेत्ते सर्वे भावाः सदेवहि। व्यवहारायकल्प्यंते नात्रागो भेदः सदेवतु॥ ॥येषामपि
मप्पिहि सामान्यभेदवद्वस्तु॰ स्वतोतेषामपि कुतो भेदो वस्त्वैक्याद्धर्म्यभेदतः। अपि भेदेन या बुद्धिः

श्री०

स्यात्सामान्यविशेषयोः। सादिश्चाच निष्टत्वान्नैव भेदः स्पृग्गी द्यते। एकं वेकिं नता नास्ति भेदश्चेदेक
ताकुतः। चित्रेऽप्यनुगमाभावान्न सामान्य विशेषता। स्वरूपपररूपाभ्यां यदा सदसदात्मकं। वस्त्वेके
माने विषयमज्ञावस्तो तदाकुतः। प्रत्यक्षादिनिवृत्तिश्चेत्तस्याः किंरूपमुच्यतां। स्तोमित्स मासमनश्चेत्स्या
त्तदस्त्वेवासदीहितं। अथ वस्त्वंतरज्ञानं नितरां तस्य वस्तुता। भावांतरमभावोऽपि निरुपाख्यः स नेष्यते।
तस्मादस्त्येक निष्टत्वान्न भेदोऽन्यादिगोचरः। घटोयमिति संवित्तेर्घटो मेयः प्रतीयते। नाव्यावृत्तिः पटा
दीनामतोरूप्यात्तथा पटे। घटाभावो विरुद्धत्वान्न घटेऽर्थांतरेऽपि न। अपर्युदस्य तयातस्मादधिकव्याप्यं न वस्तु
गः। घटोऽहं संविदं कुर्वन्नात्माकारं विशेषणं। आत्मानं लभते तद्वद्व्यावृत्तिं न पटादितः। पटसंवेदनप्येवं प
टमात्रविशेषणं। ईक्षते त्राधिकं नान्यदन्यादियुच्यते। संदिग्धनिश्चयाद्येवं ज्ञानधर्मा विशेषयन्। संवि
दं भिद्यते मेयाद्यसेकं ते दर्शिनं ततः तथाहमेवं ज्ञानामि मातानान्य इतीदृशः। मातृधर्मः प्रसिद्ध्यंति विशेष
तः स्ववेदनं। संविदेकास्वतः सिद्धाप्रत्ययरूपकलक्षणा। भावाभावादिरूपायव्यवहाराप्रकल्प्यते। अतो
भवमुद्धर्तुं प्यमभेदो नाप्यभिन्नता। तस्येष्टेऽनुमाना निविरोधः किं समाश्रयः।। "अविज्ञातः प्रमाणानां वि
षयो वादिनां मतः। न तस्य मानतः सिद्धिस्तत्सिद्धेः प्राक्प्रमाणमात्। अमानकं कथं वस्यादज्ञातत्वमिहोच्यतां।
कथं वा तद्विमोनोनं विषयासंभवाद्भवेत्। अज्ञातत्वक्षतिं कुर्वन्मानं मानत्वमश्नुते। मानादज्ञानतायेस्या
न सा तस्य व्यभिष्यते। अतोऽनुभवतो लब्धमज्ञातं ज्ञापयत्सदा। प्रत्यक्षादि प्रमाणं स्यान्न स्वतो नापि वा
न्यतः। नाज्ञासिषमहं पूर्वमित्येवं प्रमिते घटे। पूर्वाज्ञातत्वविषयो भयोऽप्यनुभवो यतः। प्रवृत्तं विष

५८

येमानमवच्छेदकत्वं मतं। ज्ञाताज्ञाते प्रतीचस्य न व्यापारोऽप्रमाणतः। सर्वो ह्यनुभवात्सिद्धां बाध्योऽप्य
ज्ञाततां स्वतः। न किंचिज्ज्ञान इत्येवं दृष्टो वाक्ये प्रमां विना। निःशेषकरग्रामलये प्यनुभवः स्वतः। अ
लुप्तदृक्सुषुप्तेऽपि जाग्रद्बोधाविशेषतः। असंतानानुभूतेषु हिमवत्स्वष्टवस्तुषु। जाग्रतोऽनुभवोऽप्येवं
सुषुप्तान्नविशिष्यते। न चात्रानुभवो लुप्तो न ज्ञानामीति बोधनात्। अदृष्टमपि दृष्टास्ति बोधो नाज्ञा
षिरं चिति। पुमान्सुप्तोत्थितोऽप्येवं प्रमात्रादिलयं स्वतः। अनुभूत्यैव संधत्ते नांतरा तोऽस्य लुप्तता। न
चेदानींतनाद्बोधाद्बोधान्नावगतिर्भवेत्॥२०००॥ तोषुप्तीन हि बोधस्य कालभेदेन भिन्नता। बोधा
देव प्रसिद्धेति कावस्थादयापतः। मातृमानादयश्चापि कुतस्तोऽरस्य विक्रिया। प्रमातृमानतन्मेयव्यागमापायि
षु त्रिषु। अलुप्तानुदितो बाधः प्रथते प्रत्यगेकलः। अनुतोऽनुभवाकांताज्ञाताज्ञातलक्षमिषु। नान्यत्राथः प्र
सिद्ध्यंति व्रियं ते चाप्यनात्मनि। अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः। अज्ञादीनां स्वतः सिद्धोऽनुभवं स्वज्ञातता
न तु। स्वतः सिद्धोऽपि वस्त्वेषोऽनुभवं त्यात्मा प्रमां विना। प्राग्बाधकागमात्सिद्धिर्लौकिकस्यापि वस्तुनः। वस्तुतत्त्वब
त्वादेव तत्त्वामोयावधानतः। कृत्स्नमायाचकपादानतमो बाधस्तु बोधतः। तत्त्वमस्यादिवाक्योत्थात्स्तृणैकात्म्यस्य
लक्षणात्। तेनागमस्य तत्र स्यादज्ञाततत्वविख्यातिनः। प्रमाणत्वं पुमर्थश्च स एव विदुषां मतः॥ ॥ननु दुर्वारसं
सार दुःखसंदर्शनतः। किमन्यस्य स्वमिष्टं स्याद्यस्याप्तेः पुरुषार्थता। लोकेऽपि व्याधिसंतापविच्छित्तौ स्व
रिपे तेष्यते। व्यतिरिक्तसुखार्थाय न प्रवृत्तिर्विरागिणः। असंवेद्यं सुखं नापि पुमर्थोऽनयकर्मता। स्वरूपे वेद्य
वेद्धत्वाद्योगाद्वैतप्रसंगतः। नै॰ ॰नेदेन संसिद्धे स्तस्वदुःखे कथं तयोः। ऐक्यं सुखस्य विच्छेदो दुःखं वाद्वि। नक

।२९।।

॥२९॥

ख्यते। अदुःखिनोपि दृश्यं ते सुखप्राप्तीच्छयापायतः। तदुपाये प्रवर्तीतस्तच्छेदे न फलत्यते। चंदनादिसुखोपा
यसंपन्ना सुखिनोप्यवं। सुखदुःखादिवार्ताज्ञैः प्रपद्धुवंति सुखोतरं। पुत्राद्यप्राप्तिरूपं च दुःखं तत्र न कल्प्य
ते। असचितो दुःखेषु पंदिन दुःखं वैरि दुःखवत्। तिर्यग्योप्यत एवेह कामयं ते सुखं तथा। अप्रियं विजहासंति
न तु ज्ञानेति साधनं। वेदोपि सुखमात्मानं सुखं सुख्यं प्रदर्शयत्। अनात्मानं तथा दुःखं पुमर्थत्वेन संमतः।
तदेतत्त्वे यदस्मादि वाक्येभ्यो नेकधा श्रुतं। तथा स न स्तु कामाय तस्मान्नान्यत्सुखं भवेत्। पुरुषार्थाभिसं
बंधात् विरागित्वं यथाश्रुतं। परानंदाभिलाषोपि तथाचे किं निषिध्यते। आसंतिकसुखेच्छायां यदि रागित्वमुच्यते।
विविके देरासंवादा विच्छायां किं न रागिता। अथ येरातमित्यादि वाक्ये रंगस्य पेचितो। एष ह्येवेति चव्यक्ते तैत्ति
रीयश्रुतावपि। स्वानंदाभि सुखः स्वापे बोध्यमानो तएव च। पीड्यते स्म्यादिसंपर्कसुखविच्छेदतो यथा। आनंदे

तू

कं स्वभावत्वाविद्यागत तत्र नार्थ्यते। निःसंबोधेर्थ्यते साध्ये न तु बोधेक लक्षणे॥ ॥ अधिकारस्य सोलब्ध्याप्रतिप
त्यर्थमीरणं। सर्वपुंसामिति तथा पूर्वमेवप्रपंचितं। स्वर्गादिकाम्यपि यतो मुक्तिकामयते न तु। मुक्तिं कामयमा
नोन्यत्कदादेणापि वीक्ष्यते। सर्वेषामपि नृणामधिकारो निवारितः। यतो तः सर्वतोन्नृणामिति भाष्यकृदब्रवीत्। तू)
॥ सुखेच्छाणामानयत्कक्तेकाचिज्ञोकर्मिकां क्रियां। कुर्वाणमत्रिवीक्ष्याह कुरुते कारणं इमां। ज्ञातं ध्रुवमनेने
तत् यज्ञोकर्मकमीक्ष्यते। प्राग्ज्ञातस्य निर्दिष्टत्वान्न यतो वीक्ष्यते क्वचित्। यथार्थकारकाधीनं दृष्टान्तकारणानुमा।
प्रमाणांतरगम्यत्वाद्धेतो किं फलं तदापतेत्। नयेकारकतंत्रोर्थोज्ञातस्यानुष्ठितिः कथं। नसिद्धो नापि यो भावः का
रकापेक्षाईद्यते। आरब्धेकारकत्वेन बलात्प्रामाण्यमापतेत्। व्यंग्ये तु कार्ये वेदस्य सिद्धेर्थे मानता भवेत्।
वाक्यस्य च प्रमाणत्वं नापत्नावैक गोचरं। नयेद भावः कार्योर्थः सिद्धेर्थे मानता भवेत्। अथोभया स्मकं कार्यं

टा॰ त्तिक॰

सिद्धासिद्धस्य ज्ञापकं उक्तदोषद्वयासाक्तेर्नचवस्तीद्रत्रां क्वचित्। सिद्धस्यचोजकेमानं नमानं कारकं क्वचित्।
चोदनाप्रमाणकं चेत्तत्कथं कार्यं तदुच्यते। मतविषयसंसिद्ध्या कार्यमित्यभिधीयते। यागस्सिद्धः पुरासिद्धः क
थं चोदनयामितं। प्राक्प्रयोक्तृसिद्धो किंफलं यागसिद्धितः। यागसिद्ध्यापि तत्सिद्धौ प्रयोक्तृत्वं कुतो
यतेः। यागाद्यनुष्ठिते रस्यचयादेरिवचेन्मतः। उपकारो नियोगस्य कथं न घटते तु ब्रूता। अपुमर्थो नि
योगेच तात्पर्यं स्यात्तथासति। प्रत्यर्थि निपुमर्थे तत्सुधीभिर्गृह्यते कथं। किंञ्च दिष्टवणात् पुंसः कार्यं
यत्र समीहते। उपकाराद्यपेक्षं तद्धात्वर्थः प्रसिध्यति। नचेत्सं ज्ञायते कर्मपुमर्थः कस्यचिद्विधेः।
२८॥ अज्ञोक्तेरेव न तद्वाक्यं किंञ्च गतिर्येहते। अज्ञातार्थमात्रसिद्धार्थं न कश्चित्स्ववशेगनरः। दुःखात्मके प्र २८॥
नोधत्ते यागादौ चोदनावशात्। पुमर्थमभिसंधाय यागादावथचेष्टते। फलं प्रवर्तकं प्राप्तं नियो
गस्तथासति। मंत्रोक्तेरिव किंञ्च देः प्रवृत्तिरितिचेन्मतं। प्राप्तप्राप्ती तत्र वेन्नैवं तत्पराधीनवृत्तितः। प्र
वर्तकत्वं मंत्रस्यान प्रवृत्त्यवशाद्यथा। स्वतएवनयागादेः कार्यसिद्धिस्तदा न वेद्। कारकं वा क्रियावा
स्याद्यदिवास्यात्क्रियापि ब्रूं। तस्य ब्रो किं कमासिद्धत्वे किं कलं प्रसज्यते। एकोऽस्यवक्तुर्निहेतुर्यथा
त्कन्यायवर्त्मना। न कश्चिद्दपि दोषस्याध्वचस्य स्मिन्नभनागपि। नेति नेत्यादिवाक्येभ्यो याथोनिन्या
ऽन्नतिग्। ब्रो किंकत्वं कथं तस्य सर्वमेयातिलंघिनः। इष्टमतत्त्वमभिसंधाय दध्यादिवचनेऽन्यगो।
ब्रो किंकत्वं प्रसिद्धार्थं नियोगस्य घटादिवत्॥ ॥आस्तां वेदांतमानत्वं तत्कत्वात्कामतस्ताव। वस्ता
न्यकेनर्चेन्मात्रकर्मकांडेपि। क्व वेत्। भविष्यदेदृसंबंधीवाक्यादात्मानचेन्मतः। मानांतराद्य

कः कुर्याद्दृष्टार्थक्रियाः सुधीः। नापि सांख्यश्रमासिद्धमात्मानमवगच्छतः। देहाद्यनभिसंबंधात्स्यप्रवृत्तिः स्यात्क्रिया
स्विहा। कर्मकोऽपि कार्यसिन्नाद्यक्तुं संज्ञायते न सा। तादृक्कर्मप्रतिपत्यर्थमन्यासती तिनिष्यते। कर्मत्यः फलमिच्छ
किरदृष्टं दृष्टमेव वा। देहावस्थान्तरो देशे प्रप्राणं वाच्यमात्मनः। कथं च तस्य कर्तृत्वं व्यापित्वान्निः क्रियत्वतः। न चा
कर्तुः फलं गोण्या वृत्त्यावेतु तरां न तत्। मुख्यकर्तृत्वपक्षेपि स्वनिर्मोक्षः प्रसज्यते। माने न नात्र पते ज्ञाने ज्ञापकं
किन कारकं। देहांतराभिसंबंधोनक्रियानाद्यगोचरः। लिंगसादृश्यविरहान्नानुमानोपमा तथा। शब्दादात्मनिस
सिद्धे पूर्वोक्तन्यायतोनव। कृतार्थापत्तिरप्यत्र नोन्नावो मानभावतः। न चाहंप्रत्ययासिद्धिरात्मनः स्यात्कदाचन।
बाधानुभवसंविन्नि चित्तयोरात्मवादिनः। यस्यानुभवसिद्धैव सिद्धिः स्याद्घटसिद्धिवत्। ततोहंप्रत्ययासिद्धिरा
त्मसिद्धिरहंमतेः। अन्योन्याश्रयतैवं स्यादहंबुद्ध्यात्मनोः पूर्वं। अहंधीरात्मनः कार्यकारणे नाप्यते सदा। तयोत
स्य कथं व्याप्तिरव्याप्तो मेयता कथं। क्रियाकालगुणीभावाक्रियासिद्धावसंभवात्। कर्तुः प्रमेयता न स्यादहंबु
द्ध्या कथं च न। संविद्रूपे प्रमेये च संविदव्यापृतं भवेत्। न च संविद्द्व्याभासो नानुमेयं फलं क्वचित्। घटाघ
कारसंविद्धकूहा यो मपि संविद्विसंविद्वित्रिष्ठा संवित्स्यान्न यासावात्मनीच्यते। प्रमातरिच्यमेये स्यात्फ
लं कस्येतिनिर्णयता। न मातुस्तस्य मेयचान्नापि मेये फलं क्वचित्। जडत्वात्तत्र मेयस्य फलं मातरि चेन्म
तां मेयतो जडतात्रापि संविद्भेदः प्रमाणजः। धर्मत्वेनाप्यहंबुद्धे नभेदो धर्मिणा मिता। रूपं इत्यात्मना
नान्यद्रसादेस्तद्विधिघते। इत्यादियात्मनो रूपं प्रमेयं पकुट्टीरितं। घटवत्तदहंबुद्धेः प्रत्यग्रश्चेन्नगो
चरः। अस्मत्प्रत्ययसंजिन्नं प्रत्यक्कर्तरि गोचरे। ज्ञानस्य यदुपन्यस्तं विशेषस्तात्र नेच्छते। ज्ञानबोधे
न नैवात्मामितो नाणात्मसंविदा। ज्ञानं न चयदयं भेदाद्भेदेनुभवः स्वतः। किं प्रमाणमहंरूपमुतासै

वेति कथ्यतां। प्रत्यक्त्वान्न तन्मानं नात्मा स्वार्थजडत्वतः। न चाप्यात्मान्यविज्ञाते स्वबुद्धेः सिद्धता तवायेनात्मा
स्यादहंबुद्धेरनुमेया हि सा स्फिता। निरंशस्य न चाप्यंशः कल्पनाप्युपपद्यते। स्वात्मेतं त्रेये विषयमानबो
धः सदजवत्। अज्ञातत्वं विनामानं नाहंप्रत्ययप्रासनः। अज्ञातत्वमतो वाच्यमात्मनो त्रघटादिव
त्। तस्याप्यनुजवासिद्धिय कृत्येत घटादिवत्। सिद्धे आत्मा पृथक्प्रानुनैचेन्मा तान सिद्ध्यति। प्रमाण
संप्लवोप्यत्रो दूरादेव निवर्त्तितः। अन्यत्रापि हि मानानां नैव संप्लव इष्यते। अज्ञातावगमे पद्धत्प्रमा
तर्यर्पितं फलं। नमेये सर्वमानेन तद्धन्मानान्तरैरपि। अतोनधिगतावेशात्सर्वेषां संप्लवः कुतः। मान्तरै
रवबुद्धेपि ज्ञातेप्यज्ञाततोन्यतः। अथाप्यवगमो मेये तथापि स्यान्न संप्लवः। सर्वोनधिगतेहत्तः प्रत्ययो
धिगतेः परः। सर्वेण निश्चिते चेत्स्यान्नोत्तरस्य प्रमाणता। तथा संदेहए कस्मादन्यस्मात्र विनिश्चयः। नि
सामान्यविशेषेषु नातः संप्लव इष्यते। यथान्यत्र तथेहापि वेदोतेषु लक्ष्यतां। यतो मानानि सिद्ध्यंति
जाग्रदादित्रयं तथा। भावाभावविभागश्च स प्रमातास्मीति बोध्यते। यतोऽसिद्धानि सिद्ध्यंति भावाभावोय
दाश्रयः। योनन्याधीयिदर्थश्च सर्वं योनन्यदृक्सदा। प्रमेयादित्रयं यस्मात्परस्मार विलक्षणं। आत्मानं
लक्षते सत्यः सोध्यत्नो त्रालक्ष्यतां। असंकुचित चित्सघः प्राज्ञे स्वप्नप्रबोधवत्। तथाप्रफुल्लबो
धाब्जः प्राज्ञवत्स्वप्नबोधयोः। साक्ष्यसंबंधतः साक्षीन स्वतः साक्षितात्मनः। प्रत्यज्ञात्रेक दृष्टित्वाद्धि
यां वाचामगोचरः। असमस्तो हि कर्तृत्वमविद्यामात्रकल्पितं। तदभावान्न संसारो मुक्तो भावीनवर्त्ती
ते। स्वाभाविकरूप विषयमनुज्ञेसकल्पितां। तमः सूर्योदयेनेव ज्ञानेनोच्छस्य नाश्यते। अनादिकाल
मज्ञानं ज्ञानेनादिमता क्षणात्। ध्वस्यते नाश्यमानं हि न चास्याप्रवृत्तिरीक्ष्यते। एवं मुक्तोप्ययं प्रत्यक्चात्मा

नुभवसंश्रयात्। विसत्तेः प्रागविज्ञातः सर्वज्ञानादिसाध्यपि। तद्यमस्यादितस्तस्मादागमादेवनान्यतः।
एकास्य वस्तुनः साध्यत्वप्रतिरविनाविनो। तस्यास्यकर्मकांडेन संबंध इतीयः पुरा। प्रश्नस्तान्निर्णया
र्थायसर्वथेत्यादिरुत्तरः। ननुसिद्धे यथोक्तार्थो नारंभे हेतुरिष्यते। कृत्स्नत्रयोजना वाप्येः पूर्वोक्तैरे
वकर्मभिः। नैतदेवं सुखेप्सायाज्जिहासायाश्च दुःखतः। निदानस्यानिषिद्धत्वात्सर्वोक्तैः र्मभिः पुरा। निः
रोपाह्लाद संप्राप्तिः सर्वानर्थहुतिस्तथा। सर्वेषां प्राणिनामेतत्स्वतद्दृष्टं प्रयोजनं। आसमन्तात्स्वमेतच्च
सिद्धत्वे तन्यवद्यतः। अथैषयोवेत्र मेतिश्रुतिमानानुजन्मतितः। स्वर्गशब्दान्निधन्वायं पुंमर्थो यो य
थोदितः। स्वर्गमित्यादित्रिविकेस्य यं ते श्रातिगीयते। स्वर्गे पुमर्थमुदीरयसर्वप्राणन्नतामियं।
॥११००॥ वाङ्मनःकायचेष्टास्याप्यापितस्साधनोपमा। उत्पत्साध्यर्थ निश्चानां सर्वेषामपि कर्मणां।
स्वर्गेनैवापि कारोस्ति तस्य सिद्धत्वतः स्वतः। स्यात्मसाध्यातिरेकेण सर्वमेव हि साधनं। नाल्वंसा
ध्यांतरायेह किञ्च साध्यार्थसिद्धये। यथोक्तपुरुषार्थस्य यथाप्तस्वजावता। आत्मस्वजावतोवा
प्तिस्तथाप्यज्ञानहेतुतः। अविधाव्यवधानस्य नात्मज्ञानातिरेकतः। प्रध्वस्तिः कर्मतः कर्तुरात्मा
तेषामप्रमानतः। व्यंजकं विरुद्ध्यान्यत्साधनं कारकात्मकं। तदज्ञिव्यक्तयेनाल्वं स्वतः सिद्धस्य वस्तुनः।
कर्मभिर्नापनीतोतः प्रत्यक्षादेः प्रमाणतः। यावत्तावसम्यग्विज्ञान वह्निना सो न दह्यते। न तावत्कं चिदप्या
प्तं सुखं दुःखविवर्जितं। नाल्वं विमुक्तये काम्यं यदि नाम तथापि तु। पुंसो वैराग्यहेतुत्वादुपकार्येव तन्म
तं। असत्वदुःखफलत्वतः स्वकार्यविनिवृत्तिकृत्। विरक्तिहेतुतः कर्म प्रतिषिद्धं यथा तथा। अपि काम्यं
कृतं स वै दुःखात्मकफलत्वतः। आविरिंचात्स्वकार्येभ्यः स्यादेव विनिवृत्तये। इत्युक्तप्रतिपत्त्यर्थं भाज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुवा   त्रिवि

गमोत्तरं वचः। एकवाक्यत्वमेवं च वेदस्यस्याद सत्रायं। दक्षिणो दगयो गत्या प्रत्यग्ज्ञानमूढधीः।
बंभ्रमीत्यनिशं दुःखी पुमान्कर्मपुरःसरः। काम्येदं क्षिण मन्येति ज्ञानकृतैस्तथोत्तरं। निषिद्धेभ्यः
पश्चोजन्मकर्मसंसारसंततः। धर्माधर्मांशसाम्ये च मनुष्यत्वं प्रपद्यते। ब्रह्माद्यास्थावरांतेषु प्र
त्यग्ज्ञानहेतुजा। नामरूपे रुचिभ्राद्या स्वप्नमायेंद्रजालवत्। धर्माधर्मकृपादानसाधनानभ्य
रीगतिः। व्याकृतं नामरूपाभ्यां यद्यपीदं श्रुतौ श्रुतौ। आत्मतत्वानभिव्यक्तेर्नाभिव्यक्तं तदुच्यते।
अविद्यातिमिरोच्छित्तौ नानाविस्तृतमण्वपि। कार्यकारणवद्वस्तु नानुपास्तं तमोप्यतः। यत एवमतः
।३०॥ प्रत्यग्याथात्म्यप्रतिपत्तये। आरभ्येयं प्रयत्नेन वेदांतोपनिषत्परा। यथोक्तफलसिद्ध्यर्थमारब्धोप ॥३०
निषद्यदि। अहन्वाइ दमित्यादि कस्मान्नारभ्यते पुनः। येषामनधिकारोत्र ब्रह्ममेधे कृतोन वेदा
इत एव तु विज्ञानात् तेषां तत्फलकीर्तनं। कर्मगोचरतेवात्र विज्ञानस्यापि चेन्मतं। विकल्प्यश्रवणा
यो न्नैवं कर्मणाविषयापवा। पंजतेश्वमेधेन यश्चैवं वेद तां कृतुं। फलं तुल्यं तयोर्यत्वं कर्मणोविकृतस्तथा॥
नुपास्तोप्यपि कर्मत्वाद्यमेध कृतोरिव। नातो धियोर्थवादत्वं तद्विधेर्नितरां नयः। एतावदेव यो द
त्रेतत्तेवं विवक्षितं। प्रयोजनं तत्फलकरं विशुद्धत्रोपि भाषितुं। विद्याप्रकरणे तस्य चाम्नायः किमि
तीर्यतां। तन्यते शेषयज्ञानां मनु रागद्वेषजन्यते। सोपि ज्ञानेन संपर्को हयमेधो महाक्रतुः। संसारफ
लएवेति प्रवृत्तसंगतयोच्यते। प्रत्यग्बोधातिरेकेण साधनांतरनिस्पृहः। निश्चिताशेषकर्मोत्थ फल
फल्गुत्वबुद्धयः। मुमुक्षवः प्रवर्त्तेरन्कथनामात्मवेदने। संसारफलताकाममस्तु काम्यस्य कर्म
णः। नित्यानां मफलत्वाच्च मुमुक्षोरेवास्तु तत्फलं। न कसर्गेण सर्वेषां फलवत्वस्य संभवात्। कर्मणापि

त्रलोकादिनित्यानामेव तत्फलं। फलवत्वे हि नित्यानां काम्यत्वमिति चेन्मतं। नेवं शुद्धिप्रधानत्वाद्
गेनित्यस्य काम्यता। काम्ये विशुद्धिरस्त्येव भोगसिद्ध्यर्थमेव सा। चित्तुरागादिदेहेन नत्येद ज्ञायते
फलं। नित्येषु शुद्धिप्राधान्यात्भोगोप्य प्रतिबंधकः। भोगं जन्मगुरमीत्यं ते बुद्धिरशुद्धचुरोधतः। तमेतमि
त्यतश्चोचैवेदानुवचनादिना। विरक्ताः सर्वसंसाराज्जिज्ञासंते परंपदं। आरादेवोपकुर्वंति नित्यान्या
सविशुद्धितः। आत्माज्ञानाचिरोचितासा ज्ञानत्वात्मबोधवत्। यच्छ्रेत्कर्माण्यतो संगोः प्रत्यक्ष्रवणबु
द्धयः। अपास्तरागादिमलाईहंते शं स्व आत्मनि। अतो शेषमहानर्थहेत्वात्माज्ञानहानिकृत्। प्रत्यग्याथा
त्म्यविज्ञानजास्करोदयहेतवे। आरभ्येयं प्रयत्नेन वेदांतोपनिषत्परा॥ ॥ ॥८॥ इतिसंबंधवार्त्तिकं ॥८॥
॥ शतानि दशैकंच चत्वारिंशत्तथाष्टकं। श्लोकः संबंधभाष्येस्मिन्संख्याताः संख्यया खिलाः॥ ॥८५
॥ श्रीकृष्णपरमात्मने नमः। तत्राश्वविषयं तावद्दर्शनमुच्यते। प्राजापत्यत्वहेतोश्चाप्यश्वनामांकितादव
तः। अश्वस्य यच्छिरः साक्षात्तदुषा इति चिंतयेत्। हरेरथयवेक्षयेयोज्याः कोलादिदृष्टयः। संस्कार्यत्वो
त्पन्नो रेवं दृष्टीरंगेषु योजयेत्। कालादावमं खांगवान्नाश्च दृष्टिर्विधित्स्यते। सत्त्वश्वादिषु कालादिदृ
श्व ष्टीरंगेषु योजयेत्। असत्वात्मानमेवाश्व कल्पयित्वा नियोजयेत्। कर्तारमग्निं च चित्तसंसर्वं प्रजापतिं। अश्व
मेधफलं चार्कं वेत्ति मृत्यु यथोदितं। अकर्त्ताप्यश्वमेधस्य ब्राह्मणश्चेद्बुद्धिमान्। कृत्वात्मामृत्युरस्मीति तादा
त्म्यं सोधिगच्छति। अश्वसं॥। पानास्तत्वं तथाधैर्यापि हाटकः। राजतात्मकपात्राभ्यां गृह्येते तत्र यो ग्रहो। महि
माख्यो तयो रेतद्द्वयं इति दर्शनं। व्यत्ययेनाववोधव्या प्रथमार्थे च सप्तमी। समुद्र ईश्वरो ज्ञेयो योनिः का
रणमुच्यते। सर्वस्य जगतो यस्मादीश एव हि कारणं॥ ॥ ॥८॥ इति तृतीयस्य प्रथमं ब्राह्मणं॥ ॥८॥